श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री तूप्पुल् वेदान्त देशिकन् मङ्गळाशासन क्रमम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री तूप्पुल् वेदान्त देशिकन् मङ्गळाशासन क्रमम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ஸ்ரீ கோயில் தேஶிகன் ஸந்நிதி வாசலில்

(श्री कोयिल् देशिकन् सन्निधि वासलिल्)

दिव्यस्संप्रति दुन्दुभिर्दिशि दिशि ध्वानैर्मुहुः श्रूयते
देवानामपि हावुहावुलहरी विक्षोभयत्यम्बरम्।
आरब्धप्रतिसंस्कृतिः कृतमुखैरर्चिर्मुखैः श्रीपतेः
आज्ञाधारिभिरातिवाहिकगणैरादिश्यते पद्धतिः॥

श्रीमद्वेङ्कटनाथार्य ! फणिधरणिधराधीश
दिव्यघण्टावतार !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

உதயபானு மண்டபத்தில்

(उदयभानु मण्टपत्तिल्)

विश्वप्रीणनविश्वकर्मरचनाचातुर्यकातर्यदैः
 शिल्पैः कल्पयतीव मण्डनमसौ चेतस्स्थितेर्मण्टपः।
रत्नस्तंभभुवोऽपि रश्मय इमे सोपानगोपानसी -
 मध्यं यत्र गवाक्षयन्ति विहितप्रत्यग्रचित्रक्रमाः॥

தொண்டரடிப்பொடியில்

(तॊण्डरडिप्पॊडियिल्)

भुजङ्गमविहङ्गमप्रवरसैन्यनाथाः प्रभो
 तथैव कुमुदादयो नगरगोपुरद्वारपाः।
अचिन्त्यबलविक्रमास्त्वमिव देशसंरक्षकाः
 जितं त इति वादिनो जगदनुग्रहे जाग्रतु॥

विश्वातिशायिविश्वामित्रगोत्रभूषण !
अनन्तगुणशेवधेरनन्तसूरेरात्मसंभव !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

புண்யகோடி விமானம்

(पुण्यकोटि विमानम्)

यच्छायमाश्रित्य विनिर्मितं यत्
 पुण्यं भवेत्कोटिगुणं विवृद्धम्।
तत्पुण्यकोटीति भुवि प्रसिद्धं
 विमानराजं भुवि भावयामः॥

## ஸ்ரீராமன் ஸந்நிதியில்

## (श्रीरामन् सन्निधियिल्)

नमस्तस्मै कस्मैचन भवतु निष्किञ्चनजन -
स्वयंरक्षादीक्षासमधिकसमिन्धानयशसे।
सुराधीशस्वैरक्षणकुपितशापायुधवधू -
दृषत्तादुर्जातप्रशमनपदाम्भोजरजसे॥

पारावारपयोविशोषणकलापारीणकालानल -
ज्वालाजालविहारहारिविशिखव्यापारघोरक्रमः।
सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती
धर्मो विग्रहवानधर्मविरतिं धन्वी स तन्वीत नः॥

येनाचलप्रकृतिना रिपुसङ्क्षयार्थी
वारांनिधिं वरद पूर्वमलङ्घयस्त्वम्।
तं वीक्ष्य सेतुमधुनापि शरीरवन्तः
सर्वे षडूर्मिबहुलं जलधिं तरन्ति॥

राकान्ते रुद्धलङ्कः च्युतफणिकदनो धूम्रदृग्वज्रदंष्ट्रौ
भङ्क्त्वाऽकंपं प्रहस्तं दशमुखमकुटं कुम्भकर्णातिकायौ।
ब्रह्मास्त्रच्छिन्नकुंभादिकमथ मकराक्षं च हत्वेन्द्रशत्रुं
जित्वा घस्त्रैस्त्रिभिस्तं सहबलमवधीत् रावणं रामभद्रः॥

विषयिभिरसौ वक्त्रैर्घोरं मनोरजनीचरं
प्रशमयति यो युञ्जानानां प्रबोधशरोत्करैः।
जनकसुतया देव्या जुष्टो दिशत्यभयं सतां
दशरथसुतो देवः श्रीमान् दयामृतवारिधिः॥

अयोध्या दिव्येयं वहति सरयूरत्र विरजा
विभोरेते यूपा विधिनियमनिर्मुक्तपशवः।

अकुण्ठस्वातन्त्र्यः स्वपदमधिरोहन्नवसरे
सहानैषीदेष स्थिरचरमशेषं रघुपतिः॥

भगवति भरद्वाजे भुक्तिस्तथा शबरीगृहे
प्रभुरनुसृतो विश्वामित्रः प्लवङ्गपतिस्तथा।
भृगुपतितपो लूनं दृष्टिः खगस्य च दक्षिणा
जयति ललितोत्तुङ्गावृत्तिर्दशास्यरिपोरिति॥

शिलादेः स्त्रीत्वादिर्विपरिणतिरस्त्वद्भुतमिदं
ततोऽप्येतच्चित्रं यदुत दहनस्यैव हिमता।
तृणस्यैवास्त्रत्वं रिपुषु निहतेरेव हितता
पदत्रेणैवेह त्रिभुवनपरित्राणमिति च॥

दर्पोदग्रदशेन्द्रियाननमनोनक्तञ्चराधिष्ठिते
देहेऽस्मिन् भवसिन्धुना परिगते दीनां दशामास्थितः।
अद्यत्वे हनुमत्समेन गुरुणा प्रख्यापितार्थः पुमान्
लङ्कारुद्धविदेहराजतनयान्यायेन लालप्यते॥

ஹனுமான் ஹாரதியானவுடன்

(हनुमान् हारतियानवुडन्)

परिणतफलग्रासश्रद्धाजिघृक्षितभास्करः
पवनगरुडस्पर्धादानप्रवीणजवोल्बणः।
दशमुखपुरीदाहोत्सिक्तस्ववालधिवैभवः
रघुपतिरणारम्भक्रीडारथोऽयमुपस्थितः॥

ஸ்ரீஸ்வாமி தேஶிகனுக்கு ராமனிடமிருந்து தீர்தம்,
மாலை, ஸ்ரீஶடாரி மரியாதை ஆனவுடன்
ரகுவீரகத்யம் ஆரம்பம்

(श्रीस्वामि देशिकनुक्कु रामनिडमिरुन्दु तीर्थं,
मालै, श्रीशठारि मरियादै आनवुडन्
रघुवीरगद्यम् आरम्भम्)

कवितार्किककलभव्रजकबलीकृतिसिंह !
सकलविद्यावाहिनीजन्मशैल !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

திருவனந்தாழ்வான் ஸந்நிதியில் ஹாரதி ஆனவுடன்

(तिरुवनन्दाळ्वान् सन्निधियिल् हारति आनवुडन्)

अनन्तख्यातिसंपन्नः शुद्धसत्त्वसुधीबलः।
धत्ते बहुविधं भोगैः श्रुतिदृष्टिः स्थिराश्रयः॥

जगन्त्यशेषाणि यदेकशेषे
पर्यङ्कतां यश्च गतः प्रथिम्ना।
अलङ्घनीयं महिमानमन्यैः
भजत्यसौ भावितशेषभावः॥

ஸ்ரீதேஶிகனுக்கு மரியாதை ஆனவுடன்

(श्रीदेशिकनुक्कु मरियादै आनवुडन्)

श्लिष्यद्द्रुद्रासुकीर्तिस्तनतटघुसृणालेपसङ्क्रान्तसार -
स्फारामोदाभिलाषोन्नमितपृथुफणाचक्रवाळाभिरामः।
प्रायः प्रेयःपटीरद्रुमविटपधिया श्लिष्टपक्षीन्द्रबाहुः
व्याहन्यादस्मदीयं वृजिनभरमसौ बृन्दशो दन्दशूकः॥

ஸ்ரீ கருமாணிக்கவரதர் ஸந்நிதியில் ஹாரதி ஆனவுடன்

(श्री करुमाणिक्कवरदर् सन्निधियिल् हारति आनवुडन्)

यस्य प्रसादकलया बधिरः शृणोति
पङ्गुः प्रधावति जवेन च वक्ति मूकः।
अन्धः प्रपश्यति सुतं लभते च वन्ध्या
तं देवमेव वरदं शरणं गतोऽस्मि॥

ஸ்ரீதேஶிகனுக்கு மரியாதை ஆனவுடன்

(श्रीदेशिकनुक्कु मरियादै आनवुडन्)

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानः
नाभीनालीकरिङ्खन्मधुकरपटलीदत्तहस्तावलम्बः।
अस्माकं संपदोघानविरलतुलसीदामसञ्जातभूमा
कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः॥

श्रद्धातव्यशरण्य दिव्यदम्पतिदयादिव्यापगाव्यापक !
त्रय्यन्तप्रतिनन्दनीयविविधोदन्त !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

திருமடைப்பள்ளியில் ஹாரதி

(तिरुमडैप्पळ्ळियिल् हारति)

पद्मापतेः स्तुतिपदेन विपच्यमानं
पश्यन्त्विह प्रपदनप्रवणा महान्तः।
मद्वाक्यसंवलितमप्यजहत्स्वभावं
मान्यं यतीश्वरमहानससंप्रदायम्॥

## ஸ்ரீதேஶிகனுக்கு மரியாதை ஆனவுடன்

## (श्रीदेशिकनुक्कु मरियादै आनवुडन्)

इति यतिराजमहानसपरिमलपरिवाहवासितां पिबत।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसंप्रदायसुधाम्॥

यतिराजमहानसपरिमलपरिवाहवासित -
वेदान्तोदयनसंप्रदायपरिपोषक !
यतिपतिसंप्रदायनिरपायधनोपचित।

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

## ஸ்ரீ தாயார் கல்யாண கோடிவிமானம்

## (श्री तायार् कल्याण कोटिविमानम्)

यच्छायं समुपेत्य तातयगुरुः लक्ष्मीकुमाराभिधः
कन्यानां शतलक्षलक्षितमहादानेन सद्वर्णितः।
गार्हस्थाश्रममाकलय्य वरदं प्रीणाति तं भास्वरं
सेवे श्रीनिलयं विमानमपरं कल्याणकोट्याह्वयम्॥

## ஸ்ரீ கண்ணன் ஸந்நிதி ஹாரதி

## (श्री कण्णन् सन्निधि हारति)

नाथायैव नमःपदं भवतु नश्चित्रैश्चरित्रक्रमैः
भूयोभिर्भुवनान्यमूनि कुहनागोपाय गोपायते।
काळिन्दीरसिकाय काळियफणिस्फारस्फटावाटिका -
रङ्गोत्सङ्गविशङ्कचङ्क्रमधुरापर्यायचर्या यते॥

कंसध्वंसैकवीरो दनुजभटहतक्षोणिदुर्जातबन्धुः
गोपीनां प्राणमित्रं गुरुसुतपुनरुज्जीवनोदारकीर्तिः।
नाथो वृष्ण्यन्धकादेर्नरकपुरवधूपत्रभङ्गापहारी
पाञ्चालीवल्लभानां प्रथनमुखसुहृत् पञ्चमाम्नायसारः॥

एकीभवद्भिरयुतैरपि मन्मथानां
यत्कान्तिसिन्धुपृषतानुकृतिर्न शक्या।
संप्रेक्ष्य तं यदुपतिं यमिनोऽपि नूनं
स्त्रीभावमेव मनसा बिभरांबभूवुः॥

प्रणिपतामि भवन्तमनन्यधीः
अखिलकारणमाश्रिततारणम्।
अनुगमादनिदंप्रथमा गिरः
किमपि यत्पदमेकमधीयते॥

ஸ்ரீஸ்வாமி தேஶிகனுக்கு மரியாதை ஆனவுடன்
கோபாலவிம்ஶதி ஆரம்பம்

(श्रीस्वामि देशिकनुक्कु मरियादै आनवुडन्
गोपालविंशति आरम्भम्)

ஸ்ரீ தாயார் ஸந்நிதி அர்தமண்டபத்தில்
ஸ்ரீ தாயாருக்கு ஹாரதி ஆனவுடன்

(श्री तायार् सन्निधि अर्धमण्टपत्तिल्
श्री तायारुक्कु हारति आनवुडन्)

अनादेर्निस्सीम्नो दुरितजलधेर्यन्निरुपमं
विदुः प्रायश्चित्तं यदुरघुधुरीणाशयविदः।
तदारम्भे तस्या गिरमवदधानेन मनसा
प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम्॥

महेन्द्राग्नाविष्णुप्रभृतिषु महत्वप्रभृतिवत्
प्रपत्तव्ये तत्त्वे परिणमितवैशिष्ट्यविभवाम्।
अधृष्यत्वं धूत्वा कमितुरभिगम्यत्वजननीं
श्रियं शीतापाङ्गामहमशरणो यामि शरणम्॥

सेवे देवि त्रिदशमहिळामौळिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां सम्पदां पादपद्मम्।
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः॥

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि॥

कल्याणानामविकलनिधिः काऽपि कारुण्यसीमा
नित्यामोदा निगमवचसां मौळिमन्दारमाला।
सम्पद्दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः॥

सहधर्मचरीं शौरेः सम्मन्त्रितजगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम्॥

इयमत्र विश्वजननी समुत्थिता
कमलाविकासिकमलोदरस्थिता।
मुरमर्दनस्य भुजमध्यपीठिकाम्
अधिरुह्य विश्वमवति स्ववीक्षणैः॥

श्रीरङ्गराजदिव्याज्ञालब्ध वेदान्ताचार्यपद !
तत्सहधर्मचारिणी कृपात्ताखिलतन्त्रस्वातन्त्र्य !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

ப்ராகாரத்தில் ஸ்ரீ தேஶிகன் ப்ரஹ்மசாரிக்கு பணம் கொடுக்க அனுக்ரஹித்த ஶ்லோகம்

(प्राकारत्तिल् श्री देशिकन् ब्रह्मचारिक्कु पणम् कॊडुक्क अनुग्रहित्त श्लोकम्)

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम्।
तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम्॥

ஸ்ரீ ஸ்வாமி தேஶிகனுக்கு மஹாநவமி மண்டபத்தில் தீரத்தம், மாலை, ஸ்ரீஶடாரி, சந்தனம், மஞ்ஜள்காப்பு, மரியாதை ஆனவுடன் ஸ்ரீஸ்துதி: ஆரம்பம்,
கோஷ்டிக்கு தீர்தம் ஸ்ரீஶடாரி ஶாதித்தல்

(श्री स्वामि देशिकनुक्कु महानवमि मण्टपत्तिल् तीरत्तम्, मालै, श्रीशठारि, चन्दनम्, मञ्जळ्काप्पु, मरियादै आनवुडन् श्रीस्तुतिः आरम्भम्,
घोष्ठिक्कु तीर्थं श्रीशठारि शादित्तल्)

கருத்மான் ஸந்நிதியில் ஹாரதி ஆனவுடன்

(गरुत्मान् सन्निधियिल् हारति आनवुडन्)

अर्यम्णा धुर्ययोक्त्रग्रसनभयभृता सान्त्वितोऽनूरुबन्धात्
कोदण्डज्यां जिघृक्षेदिति चकितधिया शङ्कितः शङ्करेण।
तल्पे कल्पेत मा ते मतिरिति हरिणाऽप्यादरेणानुनीतः
पक्षीन्द्रस्त्रायतां नः फणधरमहिषीपत्रभङ्गापहारी॥

वामे वैकुण्ठशय्याफणिपतिकटको वासुकिब्रह्मसूत्रः
रक्षेन्नस्तक्षकेण ग्रथितकटितटश्चारुकार्कोटहारः।
पद्मं कर्णेऽपसव्ये प्रथिमवति महापद्ममन्यत्र बिभ्रत्
चूडायां शङ्खपालं गुळिकमपि भुजे दक्षिणे पक्षिमल्लः॥

वेगोद्वेलः सुवेले किमिदमिति मिथो मन्त्रितो वानरेन्द्रैः
मायामानुष्यलीलामभिनयति हरौ लब्धसेवाविशेषः।
वैदेहीकर्णपूरस्तबकसुरभिणा यः समाश्लेषि दोष्णा
तृष्णापारिप्लवानां स भवतु गरुडो दुःखवारिप्लवो नः॥

दुग्धोदन्वत्प्रभूतः स्वकमहिमपृथुर्विष्णुना कृष्णनाम्ना
पिञ्छाकल्पानुकल्पः समघटि सुदृढो यत्प्रदिष्टः किरीटः।
वीरो वैरोचनास्त्रव्रणकिणगुणितोदग्रनिर्घातघातः
सङ्घातं सर्पघाती स हरतु महतामस्मदत्याहितानाम्॥

ஸ்ரீ ஸ்வாமிக்கு மரியாதை ஆனவுடன்
கருடதண்டகம் ஆரம்பம்

(श्री स्वामिक्कु मरियादै आनवुडन्
गरुडदण्डकम् आरम्भम्)

ஸ்ரீ அழகிய சிங்கர் ஸந்நிதி ஹாரதி

(श्री अळगिय शिङ्गर् सन्निधि हारति)

किमत्र हरिरित्यथ प्रकटितोपहासक्रमं
हिरण्यकरघट्टितात्सपदि जृम्भितः स्तम्भतः।
पुरः स्फुरति सम्भ्रमस्फुटसटाच्छटाच्छोटन
त्रुटद्घनघनारवद्विगुणबृंहितः सिंहराट्॥

भक्तस्य दानवशिशोः परिपालनाय
भद्रां नृसिंहकुहनामधिजग्मुषस्ते।
स्तम्भैकवर्जमधुनापि करीश नूनं
त्रैलोक्यमेतदखिलं नरसिम्हगर्भम्॥

सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधि परिस्फुटद्भ्रुकुटिकेऽपि वक्त्रे कृते।
कृपा कपटकेसरिन् दनुजडिम्भदत्तस्तना
सरोजसदृशा दृशा व्यतिभिषज्य ते व्यज्यते॥

प्रत्यादिष्टपुरातनप्रहरणग्रामः क्षणं पाणिजैः
अव्यात् त्रीणि जगन्त्यकुण्ठमहिमा वैकुण्ठकण्ठीरवः।
यत्प्रादुर्भवनादवन्ध्यजठरा यादृच्छिकाद्वेधसां
या काचित् सहसा महासुरगृहस्थूणा पितामह्यभूत्॥

विकस्वरनखस्वरुक्षतहिरण्यवक्षःस्थली -
निरर्गळविनिर्गळद्रुधिरसिन्धुसन्ध्यायिताः।
अवन्तु मदनासिकामनुजपञ्चवक्त्रस्य माम्
अहम्प्रथमिकामिथःप्रकटिताहवा बाहवः॥

दम्भोलिश्रेणिदीप्यत्खरनखरमुखक्षुण्णदैतेयवक्षो
निष्ठ्यूतासृक्स्रवन्तोभरितदशदिशादर्शितापूर्वसन्ध्यः।
स्वामिध्वंसप्रकुप्यत्सुररिपुपृतनास्तोमरूपं स एष
ब्रह्मस्तम्बैकचन्द्रो बहुभिरिह करै रन्धकारं निरुन्धे॥

विदारयति दारुणैर्वलभिदस्त्रभङ्गोद्धटां
    सटाविधुतिसंभ्रमभ्रमितसप्तलोकस्थितिः।
कुलाचलशिलातलद्रढिमडम्बरस्तम्भिनीं
    प्रभुर्द्विषदुरःस्थलीं नखरशृङ्गदम्भोलिभिः॥

प्रह्लादाह्लादनानि प्रणतसुरजनप्राणनप्रीणनानि
    प्रत्यूढस्थेमभीमप्रलयघनघटाघोषणाडम्बराणि।
क्षुभ्यत्सप्ताम्बुधीनि क्षुरपरुषनखक्रीडितक्षुण्णशात्रोः
    अस्मद्भीतिव्यपोहं विदधतु नृहरेरट्टहासाद्भुतानि॥

ஸ்ரீ ஸ்வாமி தேஶிகனுக்கு தீர்த, மாலை, ஸ்ரீஶடாரி
மரியாதை ஆனவுடன் ஆகண்டமாதிபுருஷம் என்பது முதல்
அனுஸந்தானம்,
கோஷ்டிக்கு தீர்தம் ஸ்ரீஶடாரி ஶாதித்தல்

(श्री स्वामि देशिकनुक्कु तीर्थ, मालै, श्रीशठारि
मरियादै आनवुडन् आकण्ठमादिपुरुषं ऎन्बदु मुदल् अनुसन्धानम्,
गोष्ठिक्कु तीर्थं श्रीशठारि शादित्तल्)

ஸ்ரீ ஆண்டாள் ஸந்நிதியில் ஹாரதி

(श्री आण्डाळ् सन्निधियिल् हारति)

शतमखमणिनीला चारुकल्हारहस्ता
    स्तनभरनमिताङ्गी सान्द्रवात्सल्यसिन्धुः।
अळकविनिहिताभिः स्रग्भिराकृष्टनाथा
    विलसतु हृदि गोदा विष्णुचित्तात्मजा नः॥

ஸ்ரீ தேஶிகனுக்கு மரியாதை ஆனவுடன்
கோதாஸ்துதி: ஆரம்பம்

(श्री देशिकनुक्कु मरियादै आनवुडन्
गोदास्तुतिः आरम्भम्)

ஸ்ரீ ஸேனை முதன்மையார் ஸந்நிதி ஹாரதி

(श्री सेनै मुदन्मैयार् सन्निधि हारति)

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम्।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम्॥

अशेषविघ्नशमनम् अनीकेश्वरमाश्रये।
श्रीमतः करुणाम्भोधौ शिक्षास्रोत इवोत्थितम्॥

ஸ்ரீ தேஶிகனுக்கு மரியாதை ஆனவுடன்

(श्री देशिकनुक्कु मरियादै आनवुडन्)

सुरासुराधीश्वरमौलिघातात्
विशीर्णजाम्बूनदवेत्रशृङ्गम्।
आलक्ष्य सन्तोषमलक्ष्यमन्यैः
अनीकनेतारमहं प्रपद्ये॥

तस्यास्तीरे सरसिजभुवः सौम्यवैतानवेदिः
दिव्यं कुर्वन् द्रमिडविषयं दृश्यते हस्तिशैलः।
यस्योपान्ते कृतवसतयो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः॥

सञ्चिन्वाना तरुणतुळसी दामभिस्स्वामभिख्यां
तस्यां वेद्यामनुविदधती श्यामळं हव्यवाहम्।
भोगैश्वर्यप्रियसहचरैः कापि लक्ष्मीकटाक्षैः
भूयश्श्यामा भुवनजननी देवता सन्निधत्ते॥

### ஸ்ரீ அம்மாள் மண்டபத்தில்

### (श्री अम्माळ् मण्टपत्तिल्)

बलदर्शनमण्टपं श्रुतीनां
  बहुभिर्भावितवैभवं प्रमाणैः।
अवधूतरजस्तमस्कमेतत्
  सुमतेस्सत्त्वमयं विभाति सौधम्॥

### 24 படியில் எழுந்தருளும் முன்பு

### ( 24 पडियिल् ऎऴुन्दरुळुम् मुन्बु)

इयमखिलपुमर्थप्रार्थनाकल्पवल्ली
  सितमतिभिरनन्यैः सेविता सिद्धबृन्दैः।
द्युतिभिरविरलाभिर्द्योतयन्ती दिगन्तान्
  विशति सुमतिसौधं विष्णुभक्तिर्विशुद्धम्॥

### 24 படியில் எழுந்தருளும் ஸமயம்

### ( 24 पडियिल् ऎऴुन्दरुळुम् समयम्)

सेयं सोपानपदवी श्रीमता विहिता स्वयम्।
शुद्धसत्त्वमयं भृत्यान् स्वसौधं नेतुमिच्छतः॥

निरपायदेशिक निदर्शितामिमां
  कमलासहायकरुणाधिरोहणीम्।
क्रमशोऽधिरुह्य कृतिनः समिन्धते
  परिशुद्धसत्त्वपरिकर्मिते पदे॥

### ஸ்ரீ அம்மாள் காலக்ஷேபகோஷ்டீ ப்ரணாமம்

### (श्री अम्माळ् कालक्षेपघोष्ठी प्रणामम्)

दिवि भुवि च निविष्टान् देशिकान् दिव्यभूम्नः
प्रणतिनियतवृत्तिः प्रार्थये कञ्चिदर्थम्।
अधिजिगमिषुराद्यं धाम युष्मत्प्रभावात्
प्रियगतिरनुगृह्य प्रेक्ष्यतां भूय एषः॥

अस्मद्गुरुपरमगुरून् यतिवरपूर्णौ च यामुनं रामम्।
पद्माक्षनाथशठजित्सेनेशरमारमापतीन् वन्दे॥

संसाराध्वगतागतश्रमहरस्सर्वावगाह्यस्स्वयं
श्रीसंश्लेषसमुल्लसद्घनरसः श्रीशस्तटाको महान्।
नेदिष्ठेन महापथेन सुगमो येषां प्रसादादभूत्
तीर्थं तत्र शुभं प्रकाशयतु नस्तेभ्यो गुरुभ्यो नमः॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती॥

एते मह्यमपोढमन्मथशरोन्माथाय नाथादयः
त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः स्वदन्तामिह।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः
स्पर्धाविप्लवविप्रलम्भपदवीवैदेशिका देशिकाः॥

हृद्या हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष -
क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम्।
दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्त -
त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका॥

आभगवत्तः प्रथितामनघा माचार्यसन्ततिं वन्दे।
मनसि मम यत्प्रसादात् वसति रहस्यत्रयस्य सारोऽयम्॥

कर्मब्रह्मात्मके शास्त्रे कौतस्कुतनिवर्तकान्।
वन्दे हस्तिगिरीशस्य वीथीशोधककिङ्करान्॥

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासनात्
आचार्यादिह देवतां समधिकामन्यां न मन्यामहे।
यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां
मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः॥

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन -
श्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः॥

प्रतिष्ठापितवेदान्तः प्रतिक्षिप्तबहिर्मतः।
भूयास्त्रैविद्यमान्यस्त्वं भूरिकल्याणभाजनम्॥

श्रीमद्वरदगुरुकृपालम्भितोद्दाम वैभव !
श्रीवादिहंसाम्बुवाहादाचार्यादाप्तशास्त्र !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

ஸ்ரீ பேரருளாளன் கர்பக்ருஹத்தில் ஸ்ரீபேரருளாளனுக்கு
ஹாரதி ஆனவுடன்

(श्री पेररुळाळन् गर्भगृहत्तिल् श्रीपेररुळाळनुक्कु
हारति आनवुडन्)

यामिन्यपैति यदुनाथ विमुञ्च निद्रां
उन्मेषमृच्छति तवोन्मिषितेन विश्वम्।

जातः स्वयं खलु जगद्धितमेव कर्तुं
धर्मप्रवर्तनधिया धरणीतले त्वम्॥

दृष्टिद्वयं नियतकालमिदं प्रजानां
एका निमीलित तयोरितराऽप्यलक्ष्या।
तत्तादृशोस्तव दृशोर्युगपत्प्रबोधात्
आलोकयोगमनघं भजतां त्रिलोकी॥

मधुन इव दयायास्सामरस्यं दधानैः
कमलवनमनन्यां कान्तिमध्यापयद्भिः।
फणिपतिरमणीयं नाथ पर्यङ्कमुज्झन्
परिणमय शुभं नः पावनैरक्षिपातैः॥

प्रबोधसुभगैः स्मेरैः प्रसन्नैश्शीतलैश्च नः।
कटाक्षैः पावय क्षिप्रं कृपैकोदन्वदूर्मिभिः॥

अनिभृतपरिरम्भैराहितामिन्दिरायाः
कनकवलयमुद्रां कण्ठदेशे दधानः।
फणिपतिशयनीयादुत्थितस्त्वं प्रभाते
वरद सततमन्तर्मानसं सन्निधेयाः॥

जनन्या सर्वलोकानां विष्णुवल्लभयानया।
कृपया कल्पितस्सोऽहं त्वद्भ्रूविभ्रमकिङ्करः॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती॥

साधारण्ये सत्यपि स्वेच्छयैव
द्वेधा विश्वं यद्विभूतिर्व्यभाजि।

चूडाभागे दीप्यमानौ श्रुतीनां
    दिव्यावेतौ दम्पती मे दयेताम्॥

त्रिवेदीमध्यदीप्ताय त्रिधाम्ने पञ्चहेतवे।
वरदाय नमस्तुभ्यं बाह्यान्तरहविर्भुजे॥

वरद तव विलोकयन्ति धन्याः
    मरकतभूधरमातृकायमाणम्।
व्यपगतपरिकर्मवारवाणं
    मृगमदपङ्कविशेषनीलमङ्गम्॥

तुरगविहगराजस्यन्दनान्दोळिकादि -
    ष्वधिकमधिकमन्यामात्मशोभां दधानम्।
अनवधिकविभूतिं हस्तिशैलेश्वरं त्वाम्
    अनुदिनमनिमेषैर्लोचनैर्निर्विशेयम्॥

निरन्तरं निर्विशतस्त्वदीयम्
    अस्पृष्टचिन्तापदमाभिरूप्यम्।
सत्यं शपे वारणशैलनाथ
    वैकुण्ठवासेऽपि न मेऽभिलाषः॥

व्यातन्वाना तरुणतुळसीदामभिः स्वामभिख्यां
    मातङ्गाद्रौ मरकतरुचिं पुष्णती मानसे नः।
भोगैश्वर्यप्रियसहचरैः काऽपि लक्ष्मीकटाक्षैः
    भूयः श्यामा भुवनजननी देवता सन्निधत्ताम्॥

मानार्हं महतां महानटजटापर्यन्त निर्यन्त्रण
    क्रीडाबन्धुरसिन्धुराजमहिषीजन्मास्पदं त्वत्पदम्।

मातङ्गाचलमौळि मण्डनमणेर्वन्दारुबृन्दारक
श्रेणीशेखरपारिजातकलिकाचूडालमीडामहे॥

वितर्कडोलां व्यवधूय सत्त्वे
बृहस्पतिं वर्तयसे यतस्त्वम्।
तेनैव देव त्रिदशेश्वराणाम्
अस्पृष्टडोलायितमाधिराज्यम्॥

त्वं चेत् प्रसीदसि तवास्मि समीपतश्चेत्
त्वय्यस्ति भक्तिरनघा करिशैलनाथ।
संसृज्यते यदि च दासजनस्त्वदीयः
संसार एष भगवन्नपवर्ग एव॥

संसारसागरोत्तारकारणं वारणाचले।
अविकल्पविकल्पाभ्यामध्यक्षितमुपास्महे॥

अहं मद्रक्षणभरो मद्रक्षणफलं तथा।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेत् बुधः॥

न्यस्याम्यकिञ्चनः श्रीमन् अनुकूलोऽन्यवर्जितः।
विश्वासप्रार्थनापूर्वं आत्मरक्षाभरं त्वयि॥

स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम्।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन् न्यस्यति मां स्वयम्॥

श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम्॥

त्वच्छेषत्वे स्थिरधियं त्वत्प्राप्त्येकप्रयोजनम्।
निषिद्धकाम्यरहितं कुरु मां नित्यकिङ्करम्॥

देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव।
नित्यं निरपराधेषु कैङ्कर्येषु नियुङ्क्ष्व माम्॥

मां मदीयं च निखिलं चेतनाचेतनात्मकम्।
स्वकैङ्कर्योपकरणं वरद स्वीकुरु स्वयम्॥

त्वदेकरक्ष्यस्य मम त्वमेव करुणाकर।
न प्रवर्तय पापानि प्रवृत्तानि निवर्तय॥

अकृत्यानां च करणं कृत्यानां वर्जनं च मे।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो॥

श्रीमान् नियतपञ्चाङ्गं मद्रक्षणभरार्पणम्।
अचीकरत् स्वयं स्वस्मिन् अतोऽहमिह निर्भरः॥।

संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोऽहं
 सन्त्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः।
निःशङ्कस्तत्त्वदृष्ट्या निरवधिकदयं प्रार्थ्य संरक्षकं त्वां
 न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि॥

एकं वेगवतीमध्ये हस्तिशैले च दृश्यते।
उपायफलभावेन स्वयं व्यक्तं परं महः॥

शरणमुपगतानां सोऽयमादेशकारी
 शमयति परितापं संमुखः सर्वजन्तोः।
शतगुणपरिणामः सन्निधौ यस्य नित्यं
 वरवितरणभूमा वारणाद्रीश्वरस्य॥

आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणां
 अन्यत्रैश्वर्यमित्याद्यनिपुणफणितीः आद्रियन्ते न सन्तः।

त्रय्यन्तैरेककण्ठैः तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान् नारायणो नः पतिरखिलतनुः मुक्तिदो मुक्तभोग्यः॥

திருமார்பு நாச்சியார் ஹாரதி

(तिरुमार्बु नाच्चियार् हारति)

इयमत्र विश्वजननी समुत्थिता
कमलाविकासिकमलोदरस्थिता।
मुरमर्दनस्य भुजमध्यपीठिकाम्
अधिरुह्य विश्वमवति स्ववीक्षणैः॥

देवाधिराजचरणारविन्द
युगलानुरागमहिमावदातहृदयारविन्द !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

(இந்த பாகத்தை பேரருளாளனை மங்களாஶாஸனம்
செய்யும் காலங்களில் பெரியோர்கள் அனுஸந்திப்பது வழக்கம்)

(इन्द भागत्तै पेररुळाळनै मङ्गळाशासनम्
चॆय्युम् कालङ्गळिल् पॆरियोर्गळ् अनुसन्धिप्पदु वऴक्कम्)

वाऴि अरुळाळर्⋆ वाऴि अणि अत्तिगिरि⋆
वाऴि ऎदिराशन् वाशगत्तोर्⋆ -वाऴि
शरणागदि ऎन्नुम्⋆ शार्वुडन् मट्रोन्रै⋆
अरणागक् कॊळ्ळादार् अन्बु

வாழி அருளாளர்⋆ வாழி அணி அத்திகிரி⋆
வாழி எதிராசன் வாசகத்தோர்⋆ -வாழி

சரணாகதி என்னும் ⋆ சார்வுடன் மற்றொன்றை ⋆
    அரணாகக் கொள்ளாதார் அன்பு

अत्तिगिरि अरुळाळप् पॆरुमाळ् वन्दार् ⋆
    आनै परि तेरिन् मेल् अऴगर् वन्दार् ⋆
कच्चि तनिल् कण् कॊडुक्कुम् पॆरुमाळ् वन्दार् ⋆
    करुद वरम् तरुम् तॆय्वप् पॆरुमाळ् वन्दार् ⋆
मुत्ति मऴै पॊऴियुम् मुगिल् वण्णर् वन्दार् ⋆
    मूलम् ऎन ओलम् इड वल्लार् वन्दार् ⋆
उत्तर वेदिक्कुळ्ळे उदित्तार् वन्दार् ⋆
    उम्बर् तॊऴुम् कऴल् उडैयार् वन्दार् तामे

அத்திகிரி அருளாளப் பெருமாள் வந்தார் ⋆
    ஆனை பரி தேரின் மேல் அழகர் வந்தார் ⋆
கச்சி தனில் கண் கொடுக்கும் பெருமாள் வந்தார் ⋆
    கருத வரம் தரும் தெய்வப் பெருமாள் வந்தார் ⋆
முத்தி மழை பொழியும் முகில் வண்ணர் வந்தார் ⋆
    மூலம் என ஓலம் இட வல்லார் வந்தார் ⋆
உத்தர வேதிக்குள்ளே உதித்தார் வந்தார் ⋆
    உம்பர் தொழும் கழல் உடையார் வந்தார் தாமே

इरु परिदियैन्द मगुडमुम् ⋆
    ऎऴिल् मदि तिगऴ्न्द वदनमुम् ⋆
    इरु वगै इलङ्गु कुऴैगळिल् ⋆
    ऎदिर् पॊर उगन्द मगरमुम् ⋆
ऒरु तगवुयर्न्द तिरुमगळ् ⋆
    ऒळि मऱुविन् मन्नुम् अगलमुम् ⋆
    उरु अरु उमिऴ्न्द उदरमुम् ⋆

उलगडैय निन्ऱ कळल्गळुम् ⋆
मरुविन् इडै पॊङ्गु पुनल् ऎन ⋆
मलै कुनिय निन्ऱ मलै ऎन ⋆
मरुळ् अऱ विळङ्गुम् ऒळि ऎन ⋆
मलर् अयन् उगन्द पयन् ऎन ⋆
अरुविल् उऱैगिन्ऱ उयिर् ऎन ⋆
अडियवर् उगन्द अमुदॆन ⋆
अरु मऱैगळ् ऒन्ऱि अडि तॊऴ ⋆
अरुळ् वरदर् निन्ऱ पॆरुमैये

இரு பரிதியைந்த மகுடமும் ⋆
எழில் மதி திகழ்ந்த வதனமும் ⋆
இரு வகை இலங்கு குழைகளில் ⋆
எதிர் பொர உகந்த மகரமும் ⋆
ஒரு தகவுயர்ந்த திருமகள் ⋆
ஒளி மறுவின் மன்னும் அகலமும் ⋆
உரு அரு உமிழ்ந்த உதரமும் ⋆
உலகடைய நின்ற கழல்களும் ⋆
மருவின் இடை பொங்கு புனல் என ⋆
மலை குனிய நின்ற மலை என ⋆
மருள் அற விளங்கும் ஒளி என ⋆
மலர் அயன் உகந்த பயன் என ⋆
அருவில் உறைகின்ற உயிர் என ⋆
அடியவர் உகந்த அமுதென ⋆
அரு மறைகள் ஒன்றி அடி தொழ ⋆
அருள் வரதர் நின்ற பெருமையே

तिरुमगळ् मण्मगळ् नीळै मुदला ⋆ ऎल्लात्
    तेवियरुम् तन्नुडने तिगऴ्न्दु निऱ्कत् ⋆
तरुमम् इरु मून्ऱु मुदल् अनैत्तुम् तोन्ऱत् ⋆
    तन् अनैय शूरियर् तन् अडिक् कीऴ् वाऴ ⋆
अरु मऱै शेर् अळविल्ला अवनियिन् कण् ⋆
    अरवणै मेल् वीऱ्ऱिरुप्पाल् अनैत्तुम् काक्कुम् ⋆
करुमणियैक् करिगिरि मेल् कण्डेन् ⋆ ऎन् तन्
    कडु विनैगळ् अनैत्तुम् नान् कण्डिलेने

திருமகள் மண்மகள் நீளை முதலா ⋆ எல்லாத்
    தேவியரும் தன்னுடனே திகழ்ந்து நிற்கத் ⋆
தருமம் இரு மூன்று முதல் அனைத்தும் தோன்றத் ⋆
    தன் அனைய சூரியர் தன் அடிக் கீழ் வாழ ⋆
அரு மறை சேர் அளவில்லா அவனியின் கண் ⋆
    அரவணை மேல் வீற்றிருப்பால் அனைத்தும் காக்கும் ⋆
கருமணியைக் கரிகிரி மேல் கண்டேன் ⋆ என் தன்
    கடு வினைகள் அனைத்தும் நான் கண்டிலேனே

पॊडै इरण्डै ऒर् अनम् अडैन्दु
    पिरिन्दिडा वगै पेशलाम् ⋆
    पॆरुगुम् अरुविगळ् अरुगु मरुविय
    पॆरिय मणिवरै पयिललाम् ⋆
पिडि इरण्डॊडु कळवम् ऒन्ऱु
    पिणैन्द पेर् अऴगोदलाम् ⋆
    पिरिविल् ऒळियॊडु निऴलुम् अरुगुऱुम्
    इरवि इलगुदल् परवलाम् ⋆

कॊडि इरण्डॊडु विडवि ऒन्ऱु
 कुळिर्न्दवाऱु कुलावलाम् ⋆
 कुऱैविल् शुरुदियुम् निनैवुम् इलगिय
 तरुम अरुनिलै ऎन्नलाम् ⋆
अडि इरण्डैयुम् अडैयुम् अन्बर्
 अऱिन्द पेर् अरुळाळनार् ⋆
 अणुगुम् मलर्मगळ् अवनि मगळॊडु
 करडि गिरियिनिल् अविर्दले

பெடை இரண்டை ஓர் அனம் அடைந்து
 பிரிந்திடா வகை பேசலாம் ⋆
 பெருகும் அருவிகள் அருகு மருவிய
 பெரிய மணிவரை பயிலலாம் ⋆
பிடி இரண்டொடு களவம் ஒன்று
 பிணைந்த பேர் அழகோதலாம் ⋆
 பிரிவில் ஒளியொடு நிழலும் அருகுறும்
 இரவி இலகுதல் பரவலாம் ⋆
கொடி இரண்டொடு விடவி ஒன்று
 குளிர்ந்தவாறு குலாவலாம் ⋆
 குறைவில் சுருதியும் நினைவும் இலகிய
 தரும அருநிலை என்னலாம் ⋆
அடி இரண்டையும் அடையும் அன்பர்
 அறிந்த பேர் அருளாளனார் ⋆
 அணுகும் மலர்மகள் அவனி மகளொடு
 கரடி கிரியினில் அவிர்தலே

वेर् ऒप्पार् विण् मुदलाम् कावुक्कॆल्लाम् ⋆
विऴि ऒप्पार् वेदम् ऎनुम् कण् तनक्कुक् ⋆
कार् ऒप्पार् करुणै मऴै पॊऴियु नीराल् ⋆
कडल् ऒप्पार् कण्डिडिनुम् काणाक् कूत्ताल् ⋆
नीर् ऒप्पार् निलम् अळिक्कुम् तन्मै तन्नाल् ⋆
निलम् ऒप्पार् नॆडुम् पिऴैगळ् पॊऱुक्कु नेराल् ⋆
आर् ऒप्पार् इवर् कुणङ्गळ् अनैत्तुम् कण्डाल् ⋆
अरुळाळर् ताम् ऎनिनुम् तमक्कॊव्वारे

வேர் ஒப்பார் விண் முதலாம் காவுக்கெல்லாம் ⋆
விழி ஒப்பார் வேதம் எனும் கண் தனக்குக் ⋆
கார் ஒப்பார் கருணை மழை பொழியு நீரால் ⋆
கடல் ஒப்பார் கண்டிடினும் காணாக் கூத்தால் ⋆
நீர் ஒப்பார் நிலம் அளிக்கும் தன்மை தன்னால் ⋆
நிலம் ஒப்பார் நெடும் பிழைகள் பொறுக்கு நேரால் ⋆
ஆர் ஒப்பார் இவர் குணங்கள் அனைத்தும் கண்டால் ⋆
அருளாளர் தாம் எனினும் தமக்கொவ்வாரே

திருமலை கோலப்படியில் ஸ்ரீஸ்வாமி தேஶிகனுக்கு, தீர்தம், பரிவட்டம், பீதாம்பரம், பவித்ரம், சந்தனம், மாலை, ஸ்ரீஶடாரி மரியாதை ஆனவுடன் வரதராஜபஞ்சாஶத் ஆரம்பம் கோஷ்டிக்கு தீர்தம் ஸ்ரீஶடாரி ஶாதித்தல்

(तिरुमलै कोलप्पडियिल् श्रीस्वामि देशिकनुक्कु, तीर्थं, परिवट्टम्, पीताम्बरम्, पवित्रम्, चन्दनम्, मालै, श्रीशठारि मरियादै आनवुडन् वरदराजपञ्चाशत् आरम्भम् घोष्ठिक्कु तीर्थ श्रीशठारि शादित्तल्)

## அபிஷேக மண்டபத்தில்

## (अभिषेक मण्टपत्तिल्)

वशंवदवचोवृत्तिः वादाहवमहारथः।
परिभूतविपक्षोऽसौ पारितोषिकमर्हति॥

दयया देशिकेन्द्रस्य दृष्ट्या चास्य महीपतेः।
परितोषेण चैवं ते प्राप्तोऽहं पारितोषिकम्॥

सभाजयितुमिच्छामि प्रत्यक्षितसभाजयम्।
एवं भगवतश्च्छात्रमेकभक्त्या परिष्कृतम्॥

## ஸ்ரீ தேஶிகனுக்கு மரியாதை

## (श्री देशिकनुक्कु मरियादै)

त्रय्यन्तस्थापकोऽयं दृढतरममुना तत्त्वदृष्टिश्च दिष्टा
    दिष्ट्या चादिष्टमेतत् दिशि दिशि लडहो डिण्डिमस्ताडनीयः।
शुष्कोपन्यासशिक्षापटिमकुटरटद्वैरि विद्वत्करोटी
    कुट्टाकक्रीडमष्टापदकटकमसौ वामपादे बिभर्तु॥

## பேரீ வாத்யம் வாஶித்தல்

## (भेरी वाद्यम् वाशित्तल्)

मानार्हं महतां महानटजटापर्यन्त निर्यन्त्रण
    क्रीडाबन्धुरसिन्धुराजमहिषीजन्मास्पदं त्वत्पदम्।
मातङ्गाचलमौळि मण्डनमणेर्वन्दारुबृन्दारक
    श्रेणीशेखरपारिजातकलिकाचूडालमीडामहे॥

निर्विष्टं यतिसार्वभैमवचसामावृत्तिभिर्यौवनं
    निर्धूतेतरपारतन्त्र्यनिरया नीताः सुखं वासराः।

अङ्गीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे॥

स्वतस्सिद्धश्श्रीमान् अमितगुणभूमा करुणया
विधाय ब्रह्मादीन् वितरति निजादेशमपि यः।
प्रपत्या साक्षाद्वा भजनशिरसा वापि सुलभं
मुमुक्षुर्देवेशं तमहमधिगच्छामि शरणम्॥

आस्तिक्यवान् निशितबुद्धिरनभ्यसूयुः
सत्संप्रदायपरिशुद्धमनास्सदर्थी।
सङ्केतभीतिरहितस्सतृणेष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः॥

युगपदखिलं प्रत्यक्षेण स्वतः सततं विदन्
निरवधिदयादिव्योदन्वान् अशक्यविवर्जितः।
जलधिसुतया सार्धं देवो जगत्परिपालयन्
परमपुरुषः सिद्धोपायः प्रतीष्टभरस्सताम्॥

विश्राम्यद्भिरुपर्युपर्यपि दिवा नक्तं बहिर्दर्शनैः
अस्मद्देशिकसंप्रदायरहितैरद्यापि नालक्षितः।
स्वप्राप्तेः स्वयमेव साधनतया जोघुष्यमाणः श्रुतौ
सत्त्वस्थेषु भजेत सन्निधिमसौ शान्तावधिश्शेवधिः॥

सन्दृष्टः सारवाग्वित् स्वपरनिशितधीः सङ्गजिन्नैकसंस्थः
स्पष्टोपायोऽतिखिन्नः सपरिकरभरन्यासनिष्पन्नकृत्यः।
स्वावस्थार्हं सपर्याविधिमिह नियतं व्यागसं क्वापि बिभ्रत्
निर्मुक्तस्थूलसूक्ष्मप्रकृतिरनुभवत्यच्युतं नित्यमेकः॥

अविश्रान्तश्रद्धाशतकलहकल्लोलकलुषाः
    ममाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभाः।
मधुक्षीरन्यायस्वगुणविभवासञ्जनकन -
    न्महानन्दब्रह्मानुभवपरिवाहा बहुविधाः॥

स्तोतुं निन्दितुमस्मदुक्तमथ वा सोढुं समूढं जगत्
    किं नश्छिन्नमनन्तचिन्तनरसेसुस्थे सुखं तस्थुषाम्।
शिष्याः शिक्षितबुद्धयः श्रुतिपथे येषां वयं ये च नः
    तत्सन्तोषसमर्पणक्षममिदं साडम्बरैः किं परैः॥

कलकण्ठगणास्वाद्ये कामस्यास्त्रे निजाङ्कुरे।
निम्बवृत्तिभिरुद्गीर्णे न चूतः परितप्यते॥

वरद विरचय त्वं वारिताशेषदोषां
    उपचितबहुपुण्यां भूषितां पुण्यकोट्याम्।
सितमुदितमनोभिस्तावकैः नित्यसेव्यां
    हतरिपुजनयोगां हस्तिधाम्नस्समृद्धिम्॥

श्रीरङ्गद्विरदवृषाद्रिपूर्वकेषु
    स्थानेषु स्थिरविभवा भवत्सपर्या।
आकल्पं वरद विधूतवैरिपक्षा
    भूयस्या भवदनुकम्पयैव भूयात्॥

सङ्क्षिप्तं विस्तृतं वा सरलसमुचितं सावधानप्रियं वा
    प्राधान्येन प्रणीतं परफणितिपरिष्कारवृत्त्या स्थितं वा।
शिक्षासौकर्यतुष्टिप्रचितगुरुजनानुग्रहेद्धं सुधीभिः
    श्रद्धेयं नाथजुष्टश्रुतियुवतिशिरोभूषणं भाषणं नः॥

विद्याभेदैरुपचयवतां वेदकल्पद्रुमाणां
व्यक्तोल्लासद्विजपरिबृढव्याप्तशाखाशतानाम्।
श्रेयोमार्गप्रतिभयजितो वेङ्कटेशस्य मौलौ
भूयोभूयस्सपदि भविता भूयसी पुष्पवृष्टिः॥

புஷ்பவ்ருஷ்டிவர்ஷித்தல்

(पुष्पवृष्टिवर्षित्तल्)

वायुर्दोधूयते यत् यदयमुडुगुणो बंभ्रमीति द्रुतं खे
तेजो जाज्वल्यते यत् यदपि न जलधिर्माधवीं दोधवीति।
भूर्यद्वा बोभवीति स्थिरचरधुतये तच्च तादृक् च सर्वं
स्वायत्ताशेषसत्तास्थितियतनपरब्रह्मलीलोर्मिचक्रम्॥

युक्तायुक्तवितर्कदक्षमतिभिर्युष्मद्भटैरुद्भटैः
निर्धूताखिलशल्यकण्टकततिर्नैश्रेयसी पद्धतिः।
मोहध्वंसधुरन्धरस्य तव तु त्रय्यन्तपीठे मह -
त्यासीदत्यभिषेकमङ्गलविधेरभ्यर्हितोऽयं क्षणः॥

ஸ்ரீ பேரருளாளனுக்கு திருவந்திகாப்பு -பிரியாவிடை

(श्री पेररुळाळनुक्कु तिरुवन्दिकाप्पु -पिरियाविडै)

करिशिखरिपतिनगर सुचिरकृतवास !
शुष्कोपन्यासशिक्षा पटिमकटुरटद्वैरिविद्वत्करोटी
कुट्टारकक्रीडाष्टापदकटक भृद्धामपाद !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

தொண்டரடிப்பொடியில்

(तॊण्डरडिप्पॊडियिल्)

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

யதிராஜஸப்ததி ஆரம்பம்

(यतिराजसप्तति आरम्भम्)

குளக்கரை வேணுகோபாலன் ஸந்நிதியில் ஹாரதி

(कुळक्करै वेणुगोपालन् सन्निधियिल् हारति)

अधराहितचारुवंशनाळाः
मकुटालम्बिमयूरपिञ्छमालाः।
हरिनीलशिलाविभङ्गनीलाः
प्रतिभाः सन्तु ममान्तिमप्रयाणे॥

ஸ்ரீ தேஶிகனுக்கு மரியாதை
கோபாலவிம்ஶதி ஆரம்பம்

(श्री देशिकनुक्कु मरियादै
गोपालविंशति आरम्भम्)

ஸ்ரீ வராஹன் ஸந்நிதியில் ஹாரதி

(श्री वराहन् सन्निधियिल् हारति)

गोपायेदनिशं जगन्ति कुहनापोत्री पवित्रीकृत -
ब्रह्माण्डः प्रळयोर्मिघोषगुरुभिर्घोणारवैर्घुर्घुरैः।
यद्दंष्ट्राङ्कुरकोटिगाढघटनानिष्कम्पनित्यस्थितिः
ब्रह्मस्तम्बमसौदसौ भगवती मुस्तेव विश्वम्भरा॥

स्थिरचरजगन्मातुः क्षोण्याः क्वचिच्चतुर्णवी
  विपदि सपदि क्रोडक्रीडां विभवायतः प्रभोः।
श्रुतिपरिपणश्लोकद्वन्द्वात्मना परिपक्त्रिमः
  रमयतु मनस्सत्त्वस्थानां रहस्यशिखामणिः॥

स्वस्थं चित्तं सुखमपि वपुर्धातुसाम्यं च कृत्वा
  स्वात्मानन्दस्मृतिपदमजं विश्वरूपं वितन्वन्।
काले प्राप्ते करणविलयात्काष्ठपाषाणकल्पात्
  नाथः पोत्री नयतु कृपया नाथितस्स्वं पदं नः॥

क्वापि कल्पान्तवेशन्ते खुरदघ्ने समुद्धृताम्।
वहते मेदीनीमुस्तां महते पोत्रिणे नमः॥

ஶ்ரீ ரங்கநாதன் ஸந்நிதியில் ஹாரதி

(श्री रङ्गनाथन् सन्निधियिल् हारति)

पादाम्भोजं स्पृशति भजते रङ्गनाथस्य जङ्घाम्
  ऊरुद्वन्द्वे विलगति शनैरूर्ध्वमभ्येति नाभिम्।
वक्षस्यास्ते वलति भुजयोर्मामिकेयं मनीषा
  वक्त्राभिख्यां पिबति वहते वासनां मौळिबन्धे॥

ஶ்ரீ தேஶிகனுக்கு மரியாதை ஆனவுடன்
பகவத்த்யாநஸோபானம் ஆரம்பம்

(श्री देशिकनुक्कु मरियादै आनवुडन्
भगवद्ध्यानसोपानम् आरम्भम्)

ஶ்ரீ சக்கரத்தாழ்வார் ஸந்நிதி ஹாரதி

(श्री चक्करत्ताळ्वार् सन्निधि हारति)

क्रियाशक्तिं केचित् दनुजमथनीं हेतिमपरे
मनस्तत्त्वञ्चान्ये मधुविजयिनस्त्वामभिदधुः।
तमेवैके तत्तत्पदविषयजुष्टं तदिह नः
सदोत्तुङ्गः प्रादुर्भवसि भवसिन्धुप्रमथनम्॥

स्वसङ्कल्पकलाकल्पैरायुधैरायुधेश्वरः।
जुष्टः षोडशभिर्दिव्यैर्जुषतां वः परः पुमान्॥

यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम्।
पातु वस्तत् परं चक्रं चक्ररूपस्य चक्रिणः॥

தீர்தம் மாலை ஶ்ரீஶடாரி மரியாதை ஆனவுடன்
ஸுதர்ஶனாஷ்டகம் ஆரம்பம்

(तीर्थं मालै श्रीशठारि मरियादै आनवुडन्
सुदर्शनाष्टकम् आरम्भम्)

கோஷ்டிக்கு தீர்தம் ஶ்ரீஶடாரி ஶாதித்தல்

(घोष्ठिक्कु तीर्थं श्रीशठारि शादित्तल्)

நம்மாழ்வார் ஸந்நிதியில் ஹாரதி ஆனவுடன்

(नम्माऴ्वार् सन्निधियिल् हारति आनवुडन्)

निरञ्जनमयञ्जनः किमपि नेत्रमुन्निद्रयन्
नमस्यति शठद्विषे नरकवैरिजीवातवे।
अगस्त्यगिरिनिम्नगा सुभगवीचिकासोदर -
स्वलक्षणसरस्वतीसुरभिकेसरश्लाघिने॥

यस्य सारस्वतं स्रोतो वकुळामोदवासितम्।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे॥

वर्णस्तोमैर्वकुळसुमनोवासनामुद्वहन्तीम्
    आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्।
पादे नित्यप्रणिहितधियं पादुके रङ्गभर्तुः
    त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः॥

सारस्सारस्वतानां शठरिपुफणितिः शान्तिशुद्धान्तसीमा
    मायामायामिनीभिः स्वगुणविततिभिर्बन्धयन्तीं धयन्ती।
पारंपारम्परीतो भवजलधिभवन्मज्जनानां जनानां
    प्रत्यक्प्रत्यक्षयेन्नः प्रतिनियतरमासन्निधानं निधानम्॥

सेवायोग्योऽतिभोग्यश्शुभसुभगतनुस्सर्वभोग्यातिशायी
    श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत्सत्पदव्यां सहायः
    श्रीमान् सर्वोचितायामुपनिषदि मिषत्येष गाथाशतैर्नः॥

पाञ्चालीगात्रशोभाहृतहृदयवधूवर्गपुम्भावनीत्या
    पत्यौ पद्मासहाये प्रणयिनि भजतः प्रेयसीपारतन्त्र्यम्।
भक्तिः शृङ्गारवृत्त्या परिणमति मुनेर्भावबन्धप्रथिम्ना
    योगात्प्रागुत्तरावस्थितिरिह विरहो देशिकास्तत्र दूताः॥

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
    सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा -
    परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति॥

परत्वाद्यैरित्थं परिचरणसक्तो गुणगणैः
    प्रभुं सेवायोग्यं प्रथमशतके वीक्ष्य वरदम्।
तमेव स्वात्यर्थप्रियमथ च भोक्तुं व्यवसितो
    वरेण्यत्वं तस्य प्रथमवरणीयं प्रथयति॥

ஸ்ரீ தேஶிகனுக்கு தீர்தம், மாலை, ஸ்ரீஶடாரி மரியாதையானவுடன்

(श्री देशिकनुक्कु तीर्थं, मालै, श्रीशठारि मरियादैयानवुडन्)

वन्दे विष्णुपदासक्तं तमृषिं ताञ्च पादुकाम्।
यथार्था शठजित्संज्ञा मच्चित्तविजयाद्ययोः॥

विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः
कुम्भीसूनोरसुरकबलग्रासिनः स्वैरभाषा।
नित्यं जाता शठरिपुतनोर्निष्पतन्ती मुखात् ते
प्राचीनानां श्रुतिपरिषदां पादुके ! पूर्वगण्या॥

ஸ்ரீமந்நாதமுனிகளுக்கு ஹாரதியானவுடன்

(श्रीमन्नाथमुनिगळुक्कु हारतियानवुडन्)

नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम्॥

दृष्टेऽपह्नत्यभावात् अनुमितिविषये लाघवस्यानुसारात्
शास्त्रेणैवावसेये विहितिविरहिते नास्तिकत्वप्रहाणात्।
नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैः
त्रातं सम्यग्यतीन्द्रैरिदमखिलतमः कर्शनं दर्शनं नः॥

शठरिपुशुकव्यासप्राचेतसादिनिबन्धन -
श्रमपरिणतश्रद्धाशुद्धाशय !
प्रपदनमये विद्याभेदे प्रतिष्ठितचेतस !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

## முதலாழ்வார் ஹாரதி

## (मुदलाऴ्वार् हारति)

भूतसरोवेतालान् कुलशेखरविष्णुचित्तभक्तधनान्।
भक्ताङ्घ्रिरेणुशठजित्कलिरिपुमुनिवाहनानपि भजामि॥

## ஸ்ரீ ஆளவந்தாருக்கு ஹாரதி

## (श्री आळवन्दारुक्कु हारति)

मानत्वं भगवन्मतस्य महतः पुंसस्तथा निर्णयः
तिस्रः सिद्धय आत्मसंविदखिलाधीशानतत्त्वाश्रयाः।
गीतार्थस्य च सङ्ग्रहः स्तुतियुगं श्री श्रीशयोरित्यमून्
यद्ग्रन्थाननुसन्दधे यतिपतिस्तं यामुनेयं नुमः॥

विगाहे यामुनं तीर्थं साधुबृन्दावने स्थितम्।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः॥

स्वशेषाशेषार्थो निरवधिक निर्बाधमहिमा
फलानां दाता यः फलमपि च शारीरकमितः।
श्रियं तत्सध्रीचीं तदुपसदनत्रासशमनीम्
अभिष्टौति स्तुत्यामवितथमतिर्यामुनमुनिः॥

श्रीमद्यामुनमुनिना नाथसहायेन नाथवानस्मि।
यद्वदनचन्द्रजनिता स्तोत्रसुधा भवति सुमनसां भोग्या॥

प्राप्यप्रापकभूते भगवति यामुनमुनेरयं प्रसृतः।
दुरितानि हन्त जगतां द्वयानुसन्धानसिन्धुपरिवाहः॥

## ஸ்ரீ பாஷ்யகாரருக்கு ஹாரதியானவுடன்

## (श्री भाष्यकाररुक्कु हारतियानवुडन्)

उपवीतिनमूर्ध्वपुण्ड्रवन्तं
त्रिजगत्पुण्यफलं त्रिदण्डहस्तम्।
शरणागतसार्थवाहमीडे
शिखया शेखरिणं पतिं यतीनाम्॥

जयति सकलविद्यावाहिनीजन्मशैलः
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी।
निखिलकुमतिमायाशर्वरीबालसूर्यः
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः॥

नाथः स एष यमिनां नखरश्मिजालैः
अन्तर्निलीनमपनीय तमो मदीयम्।
विज्ञानचित्रमनघं लिखतीव चित्ते
व्याख्यानकेळिरसिकेन कराम्बुजेन॥

उद्गृह्णतीमुपनिषत्सु निगूढमर्थं
चित्ते निवेशयितुमल्पधियां स्वयं नः।
पश्येम लक्ष्मणमुनेः प्रतिपन्नहस्ताम्
उन्निद्रपद्मसुभगामुपदेशमुद्राम्॥

वन्दे तं यमिनां धुरन्धरमहं मानान्धकारद्रुहा
पन्थानं परिपन्थिनां निजदृशा रुन्धानमिन्धानया।
दत्तं येन दयासुधाम्बुनिधिना पीत्वा विशुद्धं पयः
काले नः करिशैलकृष्णजलदः काङ्क्षाधिकं वर्षति॥

विष्वग्व्यापिन्यगाधे यतिनृपतियशःसम्पदेकार्णवेऽस्मिन्
श्रद्धाशुद्धावगाहैः शुभमतिभिरसौ वेङ्कटेशोऽभिषिक्तः।
प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवृत्त्या
सप्तत्या सारवत्या समतनुत सतां प्रीतिमेतां समेताम्॥

ஸ்ரீ தேஶிகனுக்கு தீர்தம் மாலை ஸ்ரீஶடாரி மரியாதை

(श्री देशिकनुक्कु तीर्थं मालै श्रीशठारि मरियादै)

स जयति यतिराजमुनिः
करुणाजलधिः क्षमापरिष्कारः।
करिशैलकृष्णमेघः
काङ्क्षितवर्षी यदर्पितैस्तोयैः॥

ஸ்ரீபாஷ்யகாரர் ஸந்நிதியில்
கோஷ்டிக்கு தீர்தம் ஸ்ரீபிள்ளான் ஶாதித்தல்

(श्रीभाष्यकारर् सन्निधि वासलिल्
घोष्ठिक्कु तीर्थं श्रीपिळ्ळान् शादित्तल्)

यतिसार्वभौमपदसात्कृताशय !
त्रिंशद्वारं श्रावितशारीरकभाष्य !

एत्सरिकै स्वामि एत्सरिकै
विजयीभव विजयीभव विजयीभव
एत्सरिकै स्वामि एत्सरिकै।

ஸ்ரீபாஷ்யகாரர் ஸந்நிதி வாசலில்
ஸ்ரீ தேஶிகதிநசர்யா ஆரம்பம்
ப்ரார்தனாஷ்டகம்

(श्रीभाष्यकारर् सन्निधि वासलिल्
श्री देशिकदिनचर्या आरम्भम्
प्रार्थनाष्टकम्)

श्रीमल्लक्ष्मणयोगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे॥

ஸ்ரீ தேஶிகன் ஸந்நிதியில் ஸ்ரீ தூப்புல் தேஶிகனுக்கு ஹாரதி ஆனவுடன்

(श्री देशिकन् सन्निधियिल् श्री तूप्पुल् देशिकनुक्कु हारति आनवुडन्)

वेदान्तदेशिकपदाम्बुजमेव नित्यं
मद्दैवतं किमपि काङ्क्षितसर्वदायि।
यद्वैभवस्य लवलेशविचिन्तनेन
बुद्धिः प्रसीदति विभूतियुगावलंबा॥

तुषारधरणीधरस्फुरदुदारकोटीतटी -
निरर्गलविनिर्गलद्विविधवाहिनीविभ्रमैः।
वचोभिरवनीतले कुमतिगर्वसर्वङ्कषः
मम स्फुरतु मानसे सपदि वेदचूडागुरुः॥

ஸ்ரீ தேஶிகன் ஸந்நிதியில் தேஶிகமங்களம் ஆரம்பம்

(श्री देशिकन् सन्निधियिल् देशिकमङ्गळम् आरम्भम्)

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

ஸ்ரீ தேஶிகனுக்கு திருவந்திகாப்பு ஹாரதி

(श्री देशिकनुक्कु तिरुवन्दिकाप्पु हारति)

ஶுபம்

(शुभम्)

॥ मङ्गळाशासन क्रमं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

# Appendix

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभगवद्ध्यानसोपानम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

अन्तर्ज्योतिः किमपि यमिनामञ्जनं योगदृष्टेः
चिन्तारत्नं सुलभमिह नः सिद्धिमोक्षानुरूपम्।
दीनानाथव्यसनशमनं दैवतं दैवतानां
दिव्यं चक्षुः श्रुतिपरिषदां दृश्यते रङ्गमध्ये ॥ 1 ॥

वेलातीतश्रुतिपरिमळं वेधसां मौलिसेव्यं
प्रादुर्भूतं कनकसरितः सैकते हंसजुष्टे।
लक्ष्मीभूम्योः करसरसिजैर्लालितं रङ्गभर्तुः
पादाम्भोजं प्रतिफलति मे भावनादीर्घिकायाम् ॥ 2 ॥

चित्राकारां कटकरुचिभिश्चारुवृत्तानुपूर्वां
काले दूत्यद्रुततरगतिं कान्तिलीलाकलाचीम्।
जानुच्छायाद्विगुणसुभगां रङ्गभर्तुर्मदात्मा
जङ्घां दृष्ट्वा जननपदवीजाङ्घिकत्वं जहाति ॥ 3 ॥

कामारामस्थिरकदलिकास्तम्भसम्भावनीयं
क्षौमाश्लिष्टं किमपि कमलाभूमिनीळोपधानम्।
न्यञ्चत्काञ्चीकिरणरुचिरं निर्विशत्यूरुयुग्मं
लावण्यौघद्वयमिव मतिर्मामिका रङ्गयूनः ॥ 4 ॥

सम्प्रीणाति प्रतिकलमसौ मानसं मे सुजाता
    गम्भीरत्वात् क्वचन समये गूढनिक्षिप्तविश्वा।
नालीकेन स्फुरितरजसा वेधसो निर्मिमाणा
    रम्यावर्तद्युतिसहचरी रङ्गनाथस्य नाभिः॥ **5** ॥

श्रीवत्सेन प्रथितविभवं श्रीपदन्यासधन्यं
    मध्यं बाह्वोर्मणिवररुचा रञ्जितं रङ्गधाम्नः।
सान्द्रच्छायं तरुणतुलसीचित्रया वैजयन्त्या
    सन्तापं मे शमयति धियश्चन्द्रिकोदारहारम्॥ **6** ॥

एकं लीलोपहितमितरं बाहुमाजानुलम्बं
    प्राप्ता रङ्गे शयितुरखिलप्रार्थनापारिजातम्।
दृप्ता सेयं दृढनियमिता रश्मिभिर्भूषणानां
    चिन्ताहस्तिन्यनुभवति मे चित्रमालानयन्त्रम्॥ **7** ॥

साभिप्रायस्मितविकसितं चारुबिम्बाधरोष्ठं
    दुःखापायप्रणयिनि जने दूरदत्ताभिमुख्यम्।
कान्तं वक्त्रं कनकतिलकालङ्कृतं रङ्गभर्तुः
    स्वान्ते गाढं मम विलगति स्वागतोदारनेत्रम्॥ **8** ॥

माल्यैरन्तः स्थिरपरिमळैर्वल्लभास्पर्शमान्यैः
    कुप्यच्चोळीवचनकुटिलैः कुन्तलैः श्लिष्टमूले।
रत्नापीडद्युतिशबळिते रङ्गभर्तुः किरीटे
    राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे॥ **9** ॥

पादाम्भोजं स्पृशति भजते रङ्गनाथस्य जङ्घाम्
    ऊरुद्वन्द्वे विलगति शनैरूर्ध्वमभ्येति नाभिम्।
वक्षस्यास्ते वलति भुजयोर्मामिकेयं मनीषा
    वक्त्राभिख्यां पिबति वहते वासनां मौळिबन्धे॥ **10** ॥

कान्तोदारैरयमिह भुजैः कङ्कणज्याकिणाङ्कैः
लक्ष्मीधाम्नः पृथुळपरिघैर्लक्षिताभीतिहेतिः।
अग्रे किञ्चिद्भुजगशयनः स्वात्मनैवात्मनः सन्
मध्येरङ्गं मम च हृदये वर्तते सावरोधः॥ **11** ॥

रङ्गास्थाने रसिकमहिते रञ्जिताशेषचित्ते
विद्वत्सेवाविमलमनसा वेङ्कटेशेन क्लृप्तम्।
अक्लेशेन प्रणिहितधियामारुरुक्षोरवस्थां
भक्तिं गाढां दिशतु भगवद्ध्यानसोपानमेतत्॥ **12** ॥

॥ इति श्रीभगवद्ध्यानसोपानं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री महावीरवैभवम् ॥

## (श्री रघुवीरगद्यम्)

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

जयत्याश्रितसन्त्रासध्वान्तविध्वंसनोदयः।
प्रभावान् सीतया देव्या परमव्योमभास्करः॥

### बालकाण्डम्

जय जय महावीर !

महाधीर धौरेय !

देवासुर समर समय समुदित निखिल निर्जर निर्धारित निरवधिक माहात्म्य !

दशवदन दमित दैवत परिषदभ्यर्थित दाशरथि भाव !

दिनकर कुल कमल दिवाकर !

दिविषदधिपति रण सहचरण चतुर दशरथ चरमऋण विमोचन !

कोसल सुता कुमार भाव कञ्चुकित कारणाकार !

कौमार केळि गोपायित कौशिकाध्वर !

रणाध्वर धुर्य भव्य दिव्यास्त्र बृन्द वन्दित !

प्रणत जन विमत विमथन दुर्ललित दोर्ललित !

तनुतर विशिख विताडन विघटित विशरारु शरारु ताटका ताटकेय !

जडकिरण शकलधर जटिल नटपति मकुट तट नटनपटु
विबुधसरिदतिबहुळ मधुगळन ललितपद नळिनरज उपमृदित
निजवृजिन जहदुपल तनुरुचिर परम मुनिवर युवति नुत !

कुशिक सुत कथित विदित नव विविध कथ !

मैथिल नगर सुलोचना लोचन चकोर चन्द्र !

खण्डपरशु कोदण्ड प्रकाण्ड खण्डन शौण्ड भुजदण्ड !

चण्डकर किरण मण्डल बोधित पुण्डरीक वन रुचि लुण्टाक लोचन !

मोचित जनक हृदय शङ्कातङ्क !

परिहृत निखिल नरपति वरण जनक दुहितृ कुचतट विहरण समुचित करतल !

शतकोटि शतगुण कठिन परशुधर मुनिवर करधृत दुरवनमतम निज धनुराकर्षण प्रकाशित पारमेष्ठ्य !

क्रतुहर शिखरि कन्तुक विहृत्युन्मुख जगदरुन्तुद जितहरि दन्ति दन्त दन्तुर दशवदन दमन कुशल दशशतभुज मुख नृपतिकुल रुधिर झर भरित पृथुतर तटाक तर्पित पितृक भृगुपति सुगति विहतिकर नत परुडिषु परिघ !

## अयोध्याकाण्डम्

अनृत भय मुषित हृदय पितृ वचन पालन प्रतिज्ञावज्ञात यौवराज्य !

निषाद राज सौहृद सूचित सौशील्य सागर !

भरद्वाज शासन परिगृहीत विचित्र चित्रकूट गिरि कटक तट रम्यावसथ !

अनन्यशासनीय !

प्रणत भरत मकुटतट सुघटित पादुकाग्र्याभिषेक निर्वर्तित सर्व लोक योग क्षेम !

पिशित रुचि विहित दुरित वलमथन तनय बलिभुगनुगति सरभस शयन तृण शकल परिपतन भय चकित सकल सुर मुनिवर बहुमत महास्त्र सामर्थ्य !

द्रुहिण हर वलमथन दुरारक्ष शरलक्ष !

## आरण्यकाण्डम्

दण्डका तपोवन जङ्गम पारिजात !

विराध हरिण शार्दूल !

विलुळित बहुफल मख कलम रजनिचर मृग मृगयारम्भ सम्भृत चीरभृदनुरोध !

त्रिशिरः शिरस्त्रितय तिमिर निरास वासरकर !

दूषण जलनिधि शोषण तोषित ऋषिगण
घोषित विजय घोषण !

खरतर खर तरु खण्डन चण्ड पवन !

द्विसप्त रक्षःसहस्र नळवन विलोलन महाकलभ !

असहाय शूर !

अनपाय साहस !

महित महामृथ दर्शन मुदित मैथिली दृढतर परिरम्भण विभव विरोपित विकट वीरव्रण !

मारीच माया मृग चर्म परिकर्मित निर्भर दर्भास्तरण !

विक्रम यशो लाभ विक्रीत जीवित गृध्रराज देह दिधक्षा लक्षित भक्तजन दाक्षिण्य !

कल्पित विबुधभाव कबन्धाभिनन्दित !

अवन्ध्य महिम मुनिजन भजन मुषित हृदय कलुष शबरी मोक्ष साक्षिभूत !

## किष्किन्धाकाण्डम्

प्रभञ्जन तनय भावुक भाषित रञ्जित हृदय !

तरणिसुत शरणागति परतन्त्रीकृत स्वातन्त्र्य !

दृढघटित कैलास कोटि विकट दुन्दुभि कङ्काळ कूट दूर विक्षेप दक्ष दक्षिणेतर पादाङ्गुष्ठ दरचलन विश्वस्त सुहृदाशय !

अतिपृथुल बहु विटपि गिरि धरणि विवर युगपदुदय विवृत चित्रपुङ्ख वैचित्र्य !

विपुल भुज शैलमूल निबिड निपीडित रावण रणरणक जनक चतुरुदधि विहरण चतुर कपिकुलपति हृदय विशाल शिलातल दारण दारुण शिलीमुख !

## सुन्दरकाण्डम्

अपार पारावार परिखा परिवृत परपुर परिसृत दव दहन जवन पवनभव कपिवर परिष्वङ्ग भावित सर्वस्व दान !

## युद्धकाण्डम्

अहित सहोदर रक्षः परिग्रह विसंवादि विविध सचिव विस्रम्भण समय संरम्भ समुज्जृम्भित सर्वेश्वर भाव !

सकृत् प्रपन्न जन संरक्षण दीक्षित !

वीर !

सत्यव्रत !

प्रतिशयन भूमिका भूषित पयोधि पुळिन !

प्रळय शिखि परुष विशिख शिखा शोषिताकूपार वारिपूर !

प्रबल रिपु कलह कुतुक चटुल कपिकुल करतल तूलित हृत गिरि निकर साधित सेतुपथ सीमा सीमन्तित समुद्र !

द्रुतगति तरुमृग वरूथिनी निरुद्ध लङ्कावरोध वेपथु लास्य लीलोपदेश देशिक धनुर्ज्याघोष !

गगन चर कनक गिरि गरिम धर निगममय निज गरुड गरुदनिल लव गळित विष वदन शर कदन !

अकृतचर वनचर रणकरण वैलक्ष्य कूणिताक्ष बहुविध रक्षो बलाध्यक्ष वक्षः कवाट पाटन पटिम साटोप कोपावलेप !

कटुरटदटनि टङ्कृति चटुल कठोर कार्मुख विनिर्गत विशङ्कट विशिख विताडन विघटित मकुट विह्वल विश्रवस्तनय विश्रम समय विश्राणन विख्यात विक्रम !

कुम्भकर्ण कुलगिरि विदळन दम्भोळि भूत निःशङ्क कङ्कपत्र !

अभिचरण हुतवह परिचरण विघटन सरभस परिपतदपरिमित कपिबल जलधि लहरि कलकलरव कुपित मघवजि दभिहननकृदनुज साक्षिक राक्षस द्वन्द्वयुद्ध !

अप्रतिद्वन्द्व पौरुष !

त्र्यम्बक समधिक घोरास्त्राडम्बर !

सारथि हृत रथ सत्रप शात्रव सत्यापित प्रताप !

शित शर कृत लवन दशमुख मुख दशक निपतन पुनरुदय दर गळित जनित दर तरळ हरिहय नयन नळिनवन रुचि खचित खतल निपतित सुरतरु कुसुम वितति सुरभित रथ पथ !

अखिल जगदधिक भुज बल वर बल दश लपन लपन दशक लवन जनित कदन परवश रजनिचर युवति विलपन वचन समविषय निगम शिखर निकर मुखर मुख मुनि वर परिपणित !

अभिगत शतमख हुतवह पितृपति निर्ऋति वरुण पवन धनद गिरिश मुख सुरपति नुति मुदित !

अमित मति विधि विदित कथित निज विभव जलधि पृषत लव !

विगत भय विबुध परिबृढ विबोधित वीरशयन शायित वानर पृतनौघ !

स्व समय विघटित सुघटित सहृदय सहधर्म चारिणीक !

विभीषण वशंवदीकृत लङ्कैश्वर्य !

निष्पन्न कृत्य !

ख पुष्पित रिपु पक्ष !

पुष्पक रभस गति गोष्पदीकृत गगनार्णव !

प्रतिज्ञार्णव तरण कृत क्षण भरत मनोरथ संहित सिंहासनाधिरूढ !

स्वामिन् !

राघव सिंह !

## उत्तरकाण्डम्

हाटक गिरि कटक लडह पाद पीठ निकट तट परिलुठित निखिल नृपति किरीट कोटि विविध मणि गण किरण निकर नीराजित चरण राजीव !

दिव्यभौमायोध्याधिदैवत !

पितृ वध कुपित परशु धर मुनि विहित नृप हनन कदन पूर्व काल प्रभव शत गुण प्रतिष्ठापित धार्मिक राजवंश !

शुभ चरित रत भरत खर्वित गर्व गन्धर्व यूथ गीत विजय गाथा शत !

शासित मधुसुत शत्रुघ्न सेवित !

कुश लव परिगृहीत कुल गाथा विशेष !

विधिवश परिणमदमर भणिति कविवर रचित निज चरित निबन्धन निशमन निर्वृत !

सर्व जन सम्मानित !

पुनरुपस्थापित विमान वर विश्राणन प्रीणित वैश्रवण विश्रावित यशःप्रपञ्च !

पञ्चतापन्न मुनिकुमार सञ्जीवनामृत !

त्रेतायुग प्रवर्तित कार्तयुग वृत्तान्त !

अविकल बहुसुवर्ण हयमख सहस्र निर्वहण निर्वर्तित निज वर्णाश्रमधर्म !

सर्व कर्म समाराध्य !

सनातन धर्म !

साकेत जनपद जनि धनिक जङ्गम तदितर जन्तु जात दिव्य गति दान दर्शित नित्य निःसीम वैभव !

भव तपन तापित भक्तजन भद्राराम !

श्रीरामभद्र !

नमस्ते पुनस्ते नमः !

चतुर्मुखेश्वरमुखैः पुत्रपौत्रादिशालिने।
नमः सीतासमेताय रामाय गृहमेधिने॥

कविकथकसिंहकथितं कठोरसुकुमारगुम्भगम्भीरम्।
भवभयभेषजमेतत् पठत महावीरवैभवं सुधियः॥

॥ इति श्री महावीरवैभवं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोपालविंशतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम्।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम्॥ 1 ॥

वाचं निजाङ्करसिकां प्रसमीक्षमाणो
वक्त्रारविन्दविनिवेशितपाञ्चजन्यः।
वर्णत्रिकोणरुचिरे वरपुण्डरीके
बद्धासनो जयति वल्लवचक्रवर्ती॥ 2 ॥

आम्नायगन्धिरुदितस्फुरिताधरोष्ठम्
आस्राविलेक्षणमनुक्षणमन्दहासम्।
गोपालडिम्भवपुषं कुहनाजनन्याः
प्राणस्तनन्धयमवैमि परं पुमांसम्॥ 3 ॥

आविर्भवत्वनिभृताभरणं पुरस्तात्
आकुञ्चितैकचरणं निभृतान्यपादम्।
दध्ना निमन्थमुखरेण निबद्धताळं
नाथस्य नन्दभवने नवनीतनाट्यम्॥ 4 ॥

हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं
दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम्।
पायादीषत् प्रचलितपदो नापगच्छन् न तिष्ठन्
मिथ्यागोपः सपदि नयने मीलयन् विश्वगोप्ता॥ 5 ॥

व्रजयोषिदपाङ्गवेधनीयं मधुराभाग्यमनन्यभोग्यमीडे।
वसुदेववधूस्तनन्धयं तत् किमपि ब्रह्म किशोरभावदृश्यम्॥ **6**॥

परिवर्तितकन्धरं भयेन स्मितफुल्लाधरपल्लवं स्मरामि।
विटपित्वनिरासकं कयोश्चित् विपुलोलूखलकर्षकं कुमारम्॥ **7**॥

निकटेषु निशामयामि नित्यं निगमान्तैरधुनाऽपि मृग्यमाणम्।
यमळार्जुनदृष्टबालकेळिं यमुनासाक्षिकयौवनं युवानम्॥ **8**॥

पदवीमदवीयसीं विमुक्तेः अटवीसंपदमम्बुवाहयन्तीम्।
अरुणाधरसाभिलाषवंशां करुणां कारणमानुषीं भजामि॥ **9**॥

अनिमेषनिषेवणीयमक्ष्णोः अजहद्यौवनमाविरस्तु चित्ते।
कलहायितकुन्तळं कलापैः करणोन्मादकविभ्रमं महो मे॥ **10**॥

अनुयायिमनोज्ञवंशनाळैः अवतु स्पर्शितवल्लवीविमोहैः।
अनघस्मितशीतळैरसौ माम् अनुकम्पासरिदम्बुजैरपाङ्गैः॥ **11**॥

अधराहितचारुवंशनाळाः मकुटालम्बिमयूरपिञ्छमालाः।
हरिनीलशिलाविभङ्गनीलाः प्रतिभाः सन्तु ममान्तिमप्रयाणे॥ **12**॥

अखिलानवलोकयामि कालान् महिळाधीनभुजान्तरस्य यूनः।
अभिलाषपदं व्रजाङ्गनानाम् अभिलापक्रमदूरमाभिरूप्यम्॥ **13**॥

हृदि मुग्धशिखण्डमण्डनो लिखितः केन ममैष शिल्पिना।
मदनातुरवल्लवाङ्गनावदनाम्भोजदिवाकरो युवा॥ **14**॥

महसे महिताय मौळिना विनतेनाञ्जलिमञ्जनत्विषे।
कलयामि विमुग्धवल्लवीवलयाभाषितमञ्जुवेणवे॥ **15**॥

जयति ललितवृत्तिं शिक्षितो वल्लवीनां
शिथिलवलयशिञ्जाशीतळैर्हस्तताळैः।

अखिलभुवनरक्षागोपवेषस्य विष्णोः
अधरमणिसुधायामंशवान् वंशनालः ॥ 16 ॥

चित्राकल्पः श्रवसि कलयन् लाङ्गलीकर्णपूरं
बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः।
गुञ्जाबद्धामुरसि ललितां धारयन् हारयष्टिं
गोपस्त्रीणां जयति कितवः कोऽपि कौमारहारी ॥ 17 ॥

लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्याम्
अंसे देव्याः पुळकरुचिरे सन्निविष्टान्यबाहुः।
मेघश्यामो जयति ललितो मेखलादत्तवेणुः
गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः ॥ 18 ॥

प्रत्यालीढस्थितिमधिगतां प्राप्तगाढाङ्कपाळिं
पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः।
भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्यात्
वारिक्रीडानिबिडवसनो वल्लवीवल्लभो नः ॥ 19 ॥

वासो हृत्वा दिनकरसुतासन्निधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम्।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित् करकमलयोरञ्जलिं याचमानः ॥ 20 ॥

इत्यनन्यमनसा विनिर्मितां वेङ्कटेशकविना स्तुतिं पठन्।
दिव्यवेणुरसिकं समीक्षते दैवतं किमपि यौवतप्रियम् ॥ 21 ॥

॥ इति श्री गोपालविंशतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

मानातीतप्रथितविभवां मङ्गळं मङ्गळानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये॥ 1 ॥

आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम्॥ 2 ॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशंसमानः।
सिद्धारम्भः सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात्॥ 3 ॥

यत्सङ्कल्पाद्भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रळयरचना जङ्गमाजङ्गमानाम्।
तत् कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवतीपादलाक्षारससाङ्कम्॥ 4 ॥

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम्।
शेषश्चित्तं विमलमनसां मौळयश्च श्रुतीनां
सम्पद्यन्ते विहरणविधौ यस्य शय्याविशेषाः॥ 5॥

उद्देश्यत्वं जननि भजतोरुज्झितोपाधिगन्धं
प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात्।
पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः॥ 6॥

पश्यन्तीषु श्रुतिषु परितः सूरिबृन्देन सार्धं
मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदम्।
विश्वाधीशप्रणयिनि सदा विभ्रमद्यूतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम्॥ 7॥

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे॥ 8॥

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तःकलहमलिनैः किञ्चिदुत्तीर्य मग्नैः।
त्वत्सम्प्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावारूढौ भगवति युवां दम्पती दैवतं नः॥ 9॥

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णोः
आचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नाम्।
प्रादुर्भावैरपि समतनुः प्राध्वमन्वीयसे त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः॥ 10॥

धत्ते शोभां हरि मरकते तावकी मूर्तिराद्या
तन्वी तुङ्गस्तनभरनता तप्तजाम्बूनदाभा।
यस्यां गच्छन्त्युदयविलयैर्नित्यमानन्दसिन्धौ
इच्छावेगोल्लसितलहरीविभ्रमं व्यक्तयस्ते ॥ **11** ॥

आसंसारं विततमखिलं वाङ्मयं यद्विभूतिः
यद्भ्रूभङ्गात् कुसुमधनुषः किङ्करो मेरुधन्वा।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥ **12** ॥

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णाम्
अम्भोराशेरधिगतसुधासम्प्लवादुत्थितां त्वाम्।
पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
क्लृप्तारम्भाः कनककलशैरभ्यषिञ्चन् गजेन्द्राः ॥ **13** ॥

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकारस्थिरसमुदयां सम्पदं निर्विशन्ति ॥ **14** ॥

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहैः
अम्भोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते सम्पदोघाः ॥ **15** ॥

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम्।
तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ **16** ॥

श्रेयस्कामाः कमलनिलये चित्रमाम्नायवाचां
    चूडापीडं तव पदयुगं चेतसा धारयन्तः।
छत्रच्छायासुभगशिरसश्चामरस्मेरपार्श्वाः
    श्लाघाशब्दश्रवणमुदिताः स्रग्विणः सञ्चरन्ति ॥ **17** ॥

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
    दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम्।
अम्ब स्तम्बावधिकजननग्रामसीमान्तरेखाम्
    आलम्बन्ते विमलमनसो विष्णुकान्ते दयां ते ॥ **18** ॥

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
    मायालीढं विभवमखिलं मन्यमानास्तृणाय।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
    वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ **19** ॥

सेवे देवि त्रिदशमहिळामौळिमालार्चितं ते
    सिद्धिक्षेत्रं शमितविपदां सम्पदां पादपद्मम्।
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं
    वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ **20** ॥

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धैः
    अम्ब स्निग्धैरमृतलहरीलब्धसब्रह्मचर्यैः।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं माम्
    आकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥ **21** ॥

सम्पद्यन्ते भवभयतमीभानवस्त्वत्प्रसादात्
    भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः।
याचे किं त्वामहमिह यतः शीतलोदारशीला
    भूयो भूयो दिशसि महतां मङ्गळानां प्रबन्धान् ॥ **22** ॥

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि॥ **23** ॥

कल्याणानामविकलनिधिः काऽपि कारुण्यसीमा
नित्यामोदा निगमवचसां मौळिमन्दारमाला।
सम्पद्दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः॥ **24** ॥

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलिकलुषनिवृत्त्यै कल्पमानं प्रजानाम्।
सरसिजनिलयायाः स्तोत्रमेतत् पठन्तः
सकलकुशलसीमाः सार्वभौमा भवन्ति॥ **25** ॥

॥ इति श्रीस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गरुडदण्डकः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

नमः पन्नगनद्धाय वैकुण्ठवशवर्तिने।
श्रुतिसिन्धुसुधोत्पादमन्दराय गरुत्मते ॥ 1 ॥

गरुडमखिलवेदनीडाधिरूढं द्विषत्पीडनोत्कण्ठिताकुण्ठवैकुण्ठपीठीकृत -
स्कन्धमीडे स्वनीडागतिप्रीतरुद्रासुकीर्तिस्तनाभोगगाढोपगूढ स्फुरत्कण्टक -
व्रात वेधव्यथावेपमान द्विजिह्वाधिपाकल्पविष्फार्यमाण स्फटावाटिका
रत्नरोचिश्छटा राजिनीराजितं कान्तिकल्लोलिनीराजितम् ॥ 2 ॥

जय गरुड सुपर्ण दर्वीकराहार देवाधिपाहारहारिन् दिवौकस्पतिक्षिप्त -
दम्भोळिधाराकिणाकल्प कल्पान्तवातूल कल्पोदयानल्प वीरायितो -
द्यच्चमत्कार दैत्यारि जैत्रध्वजारोहनिर्धारितोत्कर्ष सङ्कर्षणात्मन् गरुत्मन्
मरुत्पञ्चकाधीश सत्यादिमूर्ते न कश्चित् समस्ते नमस्ते पुनस्ते नमः ॥ 3 ॥

नम इदमजहत्सपर्याय पर्यायनिर्यातपक्षानिलास्फालनोद्वेलपाथोधि
वीचीचपेटाहतागाधपाताळभाङ्कारसङ्क्रुद्धनागेन्द्रपीडासृणीभाव -
भास्वन्नखश्रेणये चण्डतुण्डाय नृत्यद्भुजङ्गभ्रुवे वज्रिणे दंष्ट्रया
तुभ्यमध्यात्मविद्या विधेया विधेया भवद्दास्यमापादयेथा दयेथाश्च मे ॥ 4 ॥

मनुरनुगत पक्षिवक्त्र स्फुरत्तारकस्तावकश्चित्रभानुप्रियाशेखरस्त्रायतां
नस्त्रिवर्गापवर्गप्रसूतिः परव्योमधामन् वलद्वेषिदर्पज्वलद्वालखिल्य -

प्रतिज्ञावतीर्ण स्थिरां तत्त्वबुद्धिं परां भक्तिधेनुं जगन्मूलकन्दे मुकुन्दे
महानन्ददोग्ध्रीं दधीथा मुधाकामहीनामहीनामहीनान्तक ॥ 5 ॥

षड्विंशद्गणचरणो नरपरिपाटीनवीनगुम्भगणः ।
विष्णुरथदण्डकोऽयं विघटयतु विपक्षवाहिनीव्यूहम् ॥ 6 ॥

विचित्रसिद्धिदः सोऽयं वेङ्कटेशविपश्चिता ।
गरुडध्वजतोषाय गीतो गरुडदण्डकः ॥ 7 ॥

॥ इति श्री गरुडदण्डकः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कामासिकाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रुतीनामुत्तरं भागं वेगवत्याश्च दक्षिणम्।
कामादधिवसन् जीयात् कश्चिदद्भुतकेसरी॥ 1 ॥

तपनेन्द्वग्निनयनः तापानपचिनोतु नः।
तापनीयरहस्यानां सारः कामासिकाहरिः॥ 2 ॥

आकण्ठमादिपुरुषं कण्ठीरवमुपरि कुण्ठितारातिम्।
वेगोपकण्ठसङ्गात् विमुक्तवैकुण्ठबहुमतिमुपासे॥ 3 ॥

बन्धुमखिलस्य जन्तोः बन्धुरपर्यङ्कबन्धरमणीयम्।
विषमविलोचनमीडे वेगवतीपुळिनकेळिनरसिंहम्॥ 4 ॥

स्वस्थानेषु मरुद्गणान् नियमयन् स्वाधीनसर्वेन्द्रियः
पर्यङ्कस्थिरधारणाप्रकटितप्रत्यङ्मुखावस्थितिः।
प्रायेण प्रणिपेदुषां प्रभुरसौ योगं निजं शिक्षयन्
कामानातनुतादशेषजगतां कामासिकाकेसरी॥ 5 ॥

विकस्वरनखस्वरुक्षतहिरण्यवक्षःस्थली -
निरर्गळविनिर्गळद्रुधिरसिन्धुसन्ध्यायिताः।
अवन्तु मदनासिकामनुजपञ्चवक्त्रस्य माम्
अहम्प्रथमिकामिथःप्रकटिताहवा बाहवः॥ 6 ॥

सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधि परिस्फुटद्भ्रुकुटिकेऽपि वक्त्रे कृते।
कृपा कपटकेसरिन् दनुजडिम्भदत्तस्तना
सरोजसदृशा दृशा व्यतिभिषज्य ते व्यज्यते॥ 7॥

त्वयि रक्षति रक्षकैः किमन्यैः
त्वयि चारक्षति रक्षकैः किमन्यैः।
इति निश्चितधीः श्रयामि नित्यं
नृहरे वेगवतीतटाश्रयं त्वाम्॥ 8॥

इत्थं स्तुतः सकृदिहाष्टभिरेष पद्यैः
श्रीवेङ्कटेशरचितैस्त्रिदशेन्द्रवन्द्यः।
दुर्दान्तघोरदुरितद्विरदेन्द्रभेदी
कामासिकानरहरिर्वितनोतु कामान्॥ 9॥

॥ इति श्री कामासिकाष्टकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोदास्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं
श्रीरङ्गराजहरिचन्दनयोगदृश्याम्।
साक्षात् क्षमां करुणया कमलामिवान्यां
गोदामनन्यशरणः शरणं प्रपद्ये ॥ 1 ॥

वैदेशिकः श्रुतिगिरामपि भूयसीनां
वर्णेषु माति महिमा न हि मादृशां ते।
इत्थं विदन्तमपि मां सहसैव गोदे
मौनद्रुहो मुखरयन्ति गुणास्त्वदीयाः ॥ 2 ॥

त्वत्प्रेयसः श्रवणयोरमृतायमानां
तुल्यां त्वदीयमणिनूपुरशिञ्जितानाम्।
गोदे त्वमेव जननि त्वदभिष्टवार्हां
वाचं प्रसन्नमधुरां मम संविधेहि ॥ 3 ॥

कृष्णान्वयेन दधतीं यमुनानुभावं
तीर्थैर्यथावदवगाह्य सरस्वतीं ते।
गोदे विकस्वरधियां भवतीकटाक्षात्
वाचः स्फुरन्ति मकरन्दमुचः कवीनाम् ॥ 4 ॥

अस्मादृशामपकृतौ चिरदीक्षितानाम्
    अह्नाय देवि दयते यदसौ मुकुन्दः।
तन्निश्चितं नियमितस्तव मौळिदाम्ना
    तन्त्रीनिनादमधुरैश्च गिरां निगुम्भैः॥ 5 ॥

शोणाऽधरेऽपि कुचयोरपि तुङ्गभद्रा
    वाचां प्रवाहनिवहेऽपि सरस्वती त्वम्।
अप्राकृतैरपि रसैर्विरजा स्वभावात्
    गोदाऽपि देवि कमितुर्ननु नर्मदाऽसि॥ 6 ॥

वल्मीकतः श्रवणतो वसुधात्मनस्ते
    जातो बभूव स मुनिः कविसार्वभौमः।
गोदे किमद्भुतमिदं यदमी स्वदन्ते
    वक्त्रारविन्दमकरन्दनिभाः प्रबन्धाः॥ 7 ॥

भोक्तुं तव प्रियतमं भवतीव गोदे
    भक्तिं निजां प्रणयभावनया गृणन्तः।
उच्चावचैर्विरहसङ्गमजैरुदन्तैः
    शृङ्गारयन्ति हृदयं गुरवस्त्वदीयाः॥ 8 ॥

मातः समुत्थितवतीमधिविष्णुचित्तं
    विश्वोपजीव्यममृतं वचसा दुहानाम्।
तापच्छिदं हिमरुचेरिव मूर्तिमन्यां
    सन्तः पयोधिदुहितुः सहजां विदुस्त्वाम्॥ 9 ॥

तातस्तु ते मधुभिदः स्तुतिलेशवश्यात्
    कर्णामृतैः स्तुतिशतैरनवाप्तपूर्वम्।
त्वन्मौळिगन्धसुभगामुपहृत्य मालां
    लेभे महत्तरपदानुगुणं प्रसादम्॥ 10 ॥

दिक् दक्षिणाऽपि परिपक्त्रिमपुण्यलभ्यात्
सर्वोत्तरा भवति देवि तवावतारात्।
यत्रैव रङ्गपतिना बहुमानपूर्वं
निद्राळुनाऽपि नियतं निहिताः कटाक्षाः॥ **11**॥

प्रायेण देवि भवतीव्यपदेशयोगात्
गोदावरी जगदिदं पयसा पुनीते।
यस्यां समेत्य समयेषु चिरं निवासात्
भागीरथीप्रभृतयोऽपि भवन्ति पुण्याः॥ **12**॥

नागेशयः सुतनु पक्षिरथः कथं ते
जातः स्वयंवरपतिः पुरुषः पुराणः।
एवंविधाः समुचितं प्रणयं भवत्याः
सन्दर्शयन्ति परिहासगिरः सखीनाम्॥ **13**॥

त्वद्भुक्तमाल्यसुरभीकृतचारुमौळेः
हित्वा भुजान्तरगतामपि वैजयन्तीम्।
पत्युस्तवेश्वरि मिथः प्रतिघातलोलाः
बर्हातपत्ररुचिमारचयन्ति भृङ्गाः॥ **14**॥

आमोदवत्यपि सदा हृदयङ्गमाऽपि
रागान्विताऽपि ललिताऽपि गुणोत्तराऽपि।
मौळिस्रजा तव मुकुन्दकिरीटभाजा
गोदे भवत्यधरिता खलु वैजयन्ती॥ **15**॥

त्वन्मौळिदामनि विभोः शिरसा गृहीते
स्वच्छन्दकल्पितसपीतिरसप्रमोदाः।
मञ्जुस्वना मधुलिहो विदधुः स्वयं ते
स्वायंवरं कमपि मङ्गळतूर्यघोषम्॥ **16**॥

विश्वायमानरजसा कमलेन नाभौ
वक्षःस्थले च कमलास्तनचन्दनेन।
आमोदितोऽपि निगमैर्विभुरङ्घ्रियुग्मे
धत्ते नतेन शिरसा तव मौळिमालाम्॥ 17॥

चूडापदेन परिगृह्य तवोत्तरीयं
मालामपि त्वदळकैरधिवास्य दत्ताम्।
प्रायेण रङ्गपतिरेष बिभर्ति गोदे
सौभाग्यसम्पदभिषेकमहाधिकारम्॥ 18॥

तुङ्गैरकृत्रिमगिरः स्वयमुत्तमाङ्गैः
यं सर्वगन्ध इति सादरमुद्वहन्ति।
आमोदमन्यमधिगच्छति मालिकाभिः
सोऽपि त्वदीयकुटिलाळकवासिताभिः॥ 19॥

धन्ये समस्तजगतां पितुरुत्तमाङ्गे
त्वन्मौळिमाल्यभरसम्भरणेन भूयः।
इन्दीवरस्रजमिवादधति त्वदीया -
न्याकेकराणि बहुमानविलोकितानि॥ 20॥

रङ्गेश्वरस्य तव च प्रणयानुबन्धात्
अन्योन्यमाल्यपरिवृत्तिमभिष्टुवन्तः।
वाचालयन्ति वसुधे रसिकास्त्रिलोकीं
न्यूनाधिकत्वसमताविषयैर्विवादैः॥ 21॥

दूर्वादळप्रतिमया तव देहकान्त्या
गोरोचनारुचिरया च रुचेन्दिरायाः।
आसीदनुज्झितशिखावळकण्ठशोभं
माङ्गळ्यदं प्रणमतां मधुवैरिगात्रम्॥ 22॥

अर्च्यं समर्च्य नियमैर्निगमप्रसूनैः
नाथं त्वया कमलया च समेयिवांसम्।
मातश्चिरं निरविशन् निजमाधिराज्यं
मान्या मनुप्रभृतयोऽपि महीक्षितस्ते ॥ 23 ॥

आर्द्रापराधिनि जनेऽप्यभिरक्षणार्थं
रङ्गेश्वरस्य रमया विनिवेद्यमाने।
पार्श्वे परत्र भवती यदि तत्र नासीत्
प्रायेण देवि वदनं परिवर्तितं स्यात् ॥ 24 ॥

गोदे गुणैरपनयन् प्रणतापराधान्
भ्रूक्षेप एव तव भोगरसानुकूलः।
कर्मानुबन्धिफलदानरतस्य भर्तुः
स्वातन्त्र्यदुर्व्यसनमर्मभिदानिदानम् ॥ 25 ॥

रङ्गे तटिद्गुणवतो रमयैव गोदे
कृष्णाम्बुदस्य घटितां कृपया सुवृष्ट्या।
दौर्गत्यदुर्विषविनाशसुधानदीं त्वां
सन्तः प्रपद्य शमयन्त्यचिरेण तापान् ॥ 26 ॥

जातापराधमपि मामनुकम्प्य गोदे
गोप्त्री यदि त्वमसि युक्तमिदं भवत्याः।
वात्सल्यनिर्भरतया जननी कुमारं
स्तन्येन वर्धयति दष्टपयोधराऽपि ॥ 27 ॥

शतमखमणिनीला चारुकल्हारहस्ता
स्तनभरनमिताङ्गी सान्द्रवात्सल्यसिन्धुः।
अळकविनिहिताभिः स्रग्भिराकृष्टनाथा
विलसतु हृदि गोदा विष्णुचित्तात्मजा नः ॥ 28 ॥

इति विकसितभक्तेरुत्थितां वेङ्कटेशात्
बहुगुणरमणीयां वक्ति गोदास्तुतिं यः।
स भवति बहुमान्यः श्रीमतो रङ्गभर्तुः
चरणकमलसेवां शाश्वतीमभ्युपैष्यन्॥ **29**॥

॥ इति श्री गोदास्तुतिः समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवरदराजपञ्चाशत् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

द्विरदशिखरिसीम्ना सद्भवान् पद्मयोनेः
तुरगसवनवेद्यां श्यामळो हव्यवाहः।
कलशजलधिकन्यावल्लरीकल्पशाखी
कलयतु कुशलं नः कोऽपि कारुण्यराशिः ॥ 1 ॥

यस्यानुभावमधिगन्तुमशक्नुवन्तो
मुह्यन्त्यभङ्गुरधियो मुनिसार्वभौमाः।
तस्यैव ते स्तुतिषु साहसमश्नुवानः
क्षन्तव्य एष भवता करिशैलनाथ ॥ 2 ॥

जानन्ननादि विहितानपराधवर्गान्
स्वामिन् भयात् किमपि वक्तुमहं न शक्तः।
अव्याजवत्सल तथापि निरङ्कुशं मां
वात्सल्यमेव भवतो मुखरीकरोति ॥ 3 ॥

किं व्याहरामि वरद स्तुतये कथं वा
खद्योतवत् प्रलघुसङ्कुचितप्रकाशः।
तन्मे समर्पय मतिं च सरस्वतीं च
त्वामञ्जसा स्तुतिपदैर्यदहं धिनोमि ॥ 4 ॥

मच्छक्तिमात्रगणने किमिहास्ति शक्यं
शक्येन वा तव करीश किमस्ति साध्यम्।
यद्यस्ति साधय मया तदपि त्वया वा
किं वा भवेद् भवति किञ्चिदनीहमाने॥ 5॥

स्तोत्रं मया विरचितं त्वदधीनवाचा
त्वत्प्रीतये वरद यत् तदिदं न चित्रम्।
आवर्जयन्ति हृदयं खलु शिक्षकाणां
मञ्जूनि पञ्जरशकुन्तविजल्पितानि॥ 6॥

यं चक्षुषामविषयं हयमेधयज्वा
द्राघीयसा सुचरितेन ददर्श वेधाः।
तं त्वां करीश करुणापरिणामतस्ते
भूतानि हन्त निखिलानि निशामयन्ति॥ 7॥

तत्तत्पदैरुपहितेऽपि तुरङ्गमेधे
शक्रादयो वरद पूर्वमलब्धभागाः।
अध्यक्षिते मखपतौ त्वयि चक्षुषैव
हैरण्यगर्भहविषां रसमन्वभूवन्॥ 8॥

सर्गस्थितिप्रळयविभ्रमनाटिकायां
शैलूषवद्विविधवेषपरिग्रहं त्वाम्।
सम्भावयन्ति हृदयेन करीश धन्याः
संसारवारिनिधिसन्तरणैकपोतम्॥ 9॥

प्राप्तोदयेषु वरद त्वदनुप्रवेशात्
पद्मासनादिषु शिवादिषु कञ्चुकेषु।
तन्मात्रदर्शनविलोभितशेमुषीकाः
तादात्म्यमूढमतयो निपतन्त्यधीराः॥ 10॥

मध्ये विरिञ्चिशिवयोर्विहितावतारः
    ख्यातोऽसि तत्समतया तदिदं न चित्रम्।
मायावशेन मकरादिशरीरिणं त्वां
    तानेव पश्यति करीश यदेष लोकः॥ **11** ॥

ब्रह्मेति शङ्कर इतीन्द्र इति स्वराडि -
    त्यात्मेति सर्वमिति सर्वचराचरात्मन्।
हस्तीश सर्ववचसामवसानसीमां
    त्वां सर्वकारणमुशन्त्यनपायवाचः॥ **12** ॥

आशाधिपेषु गिरिशेषु चतुर्मुखेष्व -
    प्यव्याहता विधिनिषेधमयी तवाज्ञा।
हस्तीश नित्यमनुपालनलङ्घनाभ्यां
    पुंसां शुभाशुभमयानि फलानि सूते॥ **13** ॥

त्राताऽऽपदि स्थितिपदं भरणं प्ररोहः
    छाया करीश सरसानि फलानि च त्वम्।
शाखागतत्रिदशबृन्दशकुन्तकानां
    किं नाम नासि महतां निगमद्रुमाणाम्॥ **14** ॥

सामान्यबुद्धिजनकाश्च सदादिशब्दाः
    तत्त्वान्तरभ्रमकृतश्च शिवादिवाचः।
नारायणे त्वयि करीश वहन्त्यनन्यम्
    अन्वर्थवृत्तिपरिकल्पितमैककण्ठ्यम्॥ **15** ॥

सञ्चिन्तयन्त्यखिलहेयविपक्षभूतं
    शान्तोदितं शमवता हृदयेन धन्याः।
नित्यं परं वरद सर्वगतं सुसूक्ष्मं
    निष्पन्दनन्दथुमयं भवतः स्वरूपम्॥ **16** ॥

विश्वातिशायिसुखरूप यदात्मकस्त्वं
व्यक्तिं करीश कथयन्ति तदात्मिकां ते।
येनाधिरोहति मतिस्त्वदुपासकानां
सा किं त्वमेव तव वेति वितर्कडोळाम् ॥ **17** ॥

मोहान्धकारविनिवर्तनजागरूके
दोषा दिवाऽपि निरवग्रहमेधमाने।
त्वत्तेजसि द्विरदशैलपते विमृष्टे
श्लाघ्येत सन्तमसपर्व सहस्रभानोः ॥ **18** ॥

रूढस्य चिन्मयतया हृदये करीश
स्तम्बानुकारिपरिणामविशेषभाजः।
स्थानेषु जाग्रति चतुर्ष्वपि सत्त्ववन्तः
शाखाविभागचतुरे तव चातुरात्म्ये ॥ **19** ॥

नागाचलेश निखिलोपनिषन्मनीषा -
मञ्जूषिकामरकतं परिचिन्वतां त्वाम्।
तन्वी हृदि स्फुरति काऽपि शिखा मुनीनां
सौदामनीव निभृता नवमेघगर्भा ॥ **20** ॥

औदन्वते महति सद्मनि भासमाने
श्लाघ्ये च दिव्यसदने तमसः परस्मिन्।
अन्तःकळेबरमिदं सुषिरं सुसूक्ष्मं
जातं करीश कथमादरणास्पदं ते ॥ **21** ॥

बालाकृतेर्वटपलाशमितस्य यस्य
ब्रह्माण्डमण्डलमभूदुदरैकदेशो।
तस्यैव तद्वरद हन्त कथं प्रभूतं
वाराहमास्थितवतो वपुरद्भुतं ते ॥ **22** ॥

भक्तस्य दानवशिशोः परिपालनाय
भद्रां नृसिंहकुहनामधिजग्मुषस्ते।
स्तम्भैकवर्जमधुनाऽपि करीश नूनं
त्रैलोक्यमेतदखिलं नरसिंहगर्भम्॥ **23**॥

क्रामन् जगत् कपटवामनतामुपेतः
त्रेधा करीश स भवान् निदधे पदानि।
अद्यापि जन्तव इमे विमलेन यस्य
पादोदकेन विधृतेन शिवा भवन्ति॥ **24**॥

येनाचलप्रकृतिना रिपुसङ्क्षयार्थी
वारां निधिं वरद पूर्वमलङ्घयस्त्वम्।
तं वीक्ष्य सेतुमधुनापि शरीरवन्तः
सर्वे षडूर्मिबहुळं जलधिं तरन्ति॥ **25**॥

इत्थं करीश दुरपह्नवदिव्यभव्य -
रूपान्वितस्य विबुधादिविभूतिसाम्यात्।
केचिद्विचित्रचरितान् भवतोऽवतारान्
सत्यान् दयापरवशस्य विदन्ति सन्तः॥ **26**॥

सौशील्यभावितधिया भवता कथञ्चित्
सञ्छादितानपि गुणान् वरद त्वदीयान्।
प्रत्यक्षयन्त्यविकलं तव सन्निकृष्टाः
पत्युस्त्विषामिव पयोदवृतान् मयूखान्॥ **27**॥

नित्यं करीश तिमिराविलदृष्टयोऽपि
सिद्धाञ्जनेन भवतैव विभूषिताक्षाः।
पश्यन्त्युपर्युपरि सञ्चरतामदृश्यं
मायानिगूढमनपायमहानिधिं त्वाम्॥ **28**॥

सद्यस्त्यजन्ति वरद त्वयि बद्धभावाः
पैतामहादिषु पदेष्वपि भावबन्धम्।
कस्मै स्वदेत सुखसञ्चरणोत्सुकाय
कारागृहे कनकशृङ्खलयाऽपि बन्धः॥ 29॥

हस्तीश दुःखविषदिग्धफलानुबन्धि -
न्याब्रह्मकीटमपराहतसम्प्रयोगे।
दुष्कर्मसञ्चयवशाद् दुरतिक्रमे नः
प्रत्यस्त्रमञ्जलिरसौ तव निग्रहास्त्रे॥ 30॥

त्वद्भक्तिपोतमवलम्बितुमक्षमाणां
पारं परं वरद गन्तुमनीश्वराणाम्।
स्वैरं लिलङ्घयिषतां भववारिराशिं
त्वामेव गन्तुमसि सेतुरभङ्गुरस्त्वम्॥ 31॥

अश्रान्तसंसरणघर्मनिपीडितस्य
भ्रान्तस्य मे वरद भोगमरीचिकासु।
जीवातुरस्तु निरवग्रहमेधमानः
देव त्वदीयकरुणामृतदृष्टिपातः॥ 32॥

अन्तः प्रविश्य भगवन्नखिलस्य जन्तोः
आसेदुषस्तव करीश भृशं दवीयान्।
सत्यं भवेयमधुनापि स एव भूयः
स्वाभाविकी तव दया यदि नान्तरायः॥ 33॥

अज्ञातनिर्गममनागमवेदिनं माम्
अन्धं न किञ्चिदवलम्बनमश्नुवानम्।
एतावतीं गमयितुः पदवीं दयाळोः
शेषाध्वलेशनयने क इवातिभारः॥ 34॥

भूयोऽपि हन्त वसतिर्यदि मे भवित्री
 याम्यासु दुर्विषहवृत्तिषु यातनासु।
सम्यग् भविष्यति ततः शरणागतानां
 संरक्षितेति बिरुदं वरद त्वदीयम्॥ **35** ॥

पर्याकुलं महति दुःखपयोनिधौ मां
 पश्यन् करीश यदि जोषमवस्थितस्त्वम्।
स्फारेक्षणेऽपि मिषति त्वयि निर्निमेषं
 पारे करिष्यति दया तव दुर्निवारा॥ **36** ॥

किं वा करीश कृपणे मयि रक्षणीये
 धर्मादिबाह्यसहकारिगवेषणेन।
नन्वस्ति विश्वपरिपालनजागरूकः
 सङ्कल्प एव भवतो निपुणः सहायः॥ **37** ॥

निर्यन्त्रणं परिणमन्ति न यावदेते
 नीरन्ध्रदुष्कृतभवा दुरितप्ररोहाः।
तावन्न चेत् त्वमुपगच्छसि शार्ङ्गधन्वा
 शक्यं त्वयापि न हि वारयितुं करीश॥ **38** ॥

यावन्न पश्यति निकाममर्मर्षणो मां
 भ्रूभङ्गभीषणकराळमुखः कृतान्तः।
तावत् पतन्तु मयि ते भगवन् दयाळोः
 उन्निद्रपद्मकलिकामधुराः कटाक्षाः॥ **39** ॥

स त्वं स एव रभसो भवदौपवाह्यः
 चक्रं तदेव शितधारमहं च पाल्यः।
साधारणे त्वयि करीश समस्तजन्तोः
 मातङ्गमानुषभिदा न विशेषहेतुः॥ **40** ॥

निर्वापयिष्यति कदा करिशैलधामन्
दुर्वारकर्मपरिपाकमहादवाग्निम्।
प्राचीनदुःखमपि मे सुखयन्निव त्वत् -
पादारविन्दपरिचाररसप्रवाहः॥ **41** ॥

मुक्तः स्वयं सुकृतदुष्कृतशृङ्खलाभ्याम्
अर्चिर्मुखैरधिकृतैरतिवाहिताध्वा।
स्वच्छन्दकिङ्करतया भवतः करीश
स्वाभाविकं प्रतिलभेय महाधिकारम्॥ **42** ॥

त्वं चेत् प्रसीदसि तवास्मि समीपतश्चेत्
त्वय्यस्ति भक्तिरनघा करिशैलनाथ।
संसृज्यते यदि च दासजनस्त्वदीयः
संसार एष भगवन्नपवर्ग एव॥ **43** ॥

आहूयमानमनपायविभूतिकामैः
आलोकलुप्तजगदान्ध्यमनुस्मरेयम्।
आलोहितांशुकमनाकुलहेतिजालं
हैरण्यगर्भहयमेधहविर्भुजं त्वाम्॥ **44** ॥

भूयो भूयः पुळकनिचितैरङ्गकैरेधमानाः
स्थूलस्थूलान् नयनमुकुळैर्बिभ्रतो बाष्पबिन्दून्।
धन्याः केचिद्वरद भवतः संसदं भूषयन्तः
स्वान्तैरन्तर्विनयनिभृतैः स्वादयन्ते पदं ते॥ **45** ॥

वरद तव विलोकयन्ति धन्याः
मरकतभूधरमातृकायमाणम्।
व्यपगतपरिकर्मवारवाणं
मृगमदपङ्कविशेषनीलमङ्गम्॥ **46** ॥

अनिभृतपरिरम्भैराहितामिन्दिरायाः
    कनकवलयमुद्रां कण्ठदेशे दधानः।
फणिपतिशयनीयादुत्थितस्त्वं प्रभाते
    वरद सततमन्तर्मानसं सन्निधेयाः॥ **47** ॥

तुरगविहगराजस्यन्दनान्दोळिकादि -
    ष्वधिकमधिकमन्यामात्मशोभां दधानम्।
अनवधिकविभूतिं हस्तिशैलेश्वरं त्वाम्
    अनुदिनमनिमेषैर्लोचनैर्निर्विशेयम्॥ **48** ॥

निरन्तरं निर्विशतस्त्वदीयम्
    अस्पृष्टचिन्तापदमाभिरूप्यम्।
सत्यं शपे वारणशैलनाथ
    वैकुण्ठवासेऽपि न मेऽभिलाषः॥ **49** ॥

व्यातन्वाना तरुणतुळसीदामभिः स्वामभिख्यां
    मातङ्गाद्रौ मरकतरुचिं पुष्णती मानसे नः।
भोगैश्वर्यप्रियसहचरैः काऽपि लक्ष्मीकटाक्षैः
    भूयः श्यामा भुवनजननी देवता सन्निधत्ताम्॥ **50** ॥

इति विहितमुदारं वेङ्कटेशेन भक्त्या
    श्रुतिसुभगमिदं यः स्तोत्रमङ्गीकरोति।
करिशिखरिविटङ्कस्थायिनः कल्पवृक्षात्
    भवति फलमशेषं तस्य हस्तापचेयम्॥ **51** ॥

॥ इति श्रीवरदराजपञ्चाशत् समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यतिराजसप्ततिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम्।
प्रवक्ता च्छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम्॥ **1** ॥

सहधर्मचरीं शौरेः सम्मन्त्रितजगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम्॥ **2** ॥

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम्।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम्॥ **3** ॥

यस्य सारस्वतं स्त्रोतो वकुळामोदवासितम्।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे॥ **4** ॥

नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम्॥ **5** ॥

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम्।
शुद्धसत्त्वमयं शौरेः अवतारमिवापरम्॥ **6** ॥

अनुज्झितक्षमायोगं अपुण्यजनबाधकम्।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे॥ **7** ॥

विगाहे यामुनं तीर्थं साधुबृन्दावने स्थितम्।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः॥ **8** ॥

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये।
येन विश्वसृजो विष्णोः अपूर्यत मनोरथः॥ 9॥

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम्।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम्॥ 10॥

उपवीतिनमूर्ध्वपुण्ड्रवन्तं त्रिजगत्पुण्यफलं त्रिदण्डहस्तम्।
शरणागतसार्थवाहमीडे शिखया शेखरिणं पतिं यतीनाम्॥ 11॥

प्रथयन् विमतेषु तीक्ष्णभावं प्रभुरस्मत्परिरक्षणे यतीन्द्रः।
अपृथक्प्रतिपन्नयन्मयत्वैः ववृधे पञ्चभिरायुधैर्मुरारेः॥ 12॥

शमितोदयशङ्करादिगर्वः स्वबलादुद्धृतयादवप्रकाशः।
अवरोपितवान् श्रुतेरपार्थान् ननु रामावरजः स एष भूयः॥ 13॥

अबहुश्रुतसम्भवं श्रुतीनां जरतीनामयथायथप्रचारम्।
विनिवर्तयितुं यतीश्वरोक्तिः विदधे ताः स्थिरनीतिपञ्जरस्थाः॥ 14॥

अमुना तपनातिशायिभूम्ना यतिराजेन निबद्धनायकश्रीः।
महती गुरुपङ्क्तिहारयष्टिः विबुधानां हृदयङ्गमा विभाति॥ 15॥

अलूनपक्षस्य यतिक्षमाभृतः विभाति वंशे हरितत्त्वमक्षतम्।
यदुद्भवाः शुद्धसुवृत्तशीतळाः भवन्ति मुक्तावळिभूषणं भुवः॥ 16॥

अनपायविष्णुपदसंश्रयं भजे कलया कयाऽपि कलयाऽप्यनुज्झितम्।
अकळङ्कयोगमजडाशयोदितं यतिराजचन्द्रमुपरागदूरगम्॥ 17॥

अभिगम्य सम्यगनघाः सुमेधसः यतिचक्रवर्तिपदपद्मपत्तनम्।
हरिभक्तदास्यरसिकाः परस्परं क्रयविक्रयार्हदशया समिन्धते॥ 18॥

परुषातिवादपरिवादपैशुनप्रभृतिप्रभूतपतनीयपङ्किला।
स्वदते ममाद्य सुभगा सरस्वती यतिराजकीर्तिकतकैर्विशोधिता॥ 19॥

अनुकल्पभूतमुरभित्पदं सताम् अजहत्त्रिवर्गमपवर्गवैभवम्।
चलचित्तवृत्तिविनिवर्तनौषधं शरणं यतीन्द्रचरणं वृणीमहे॥ 20॥

श्वसितावधूतपरवादिवैभवाः
निगमान्तनीतिजलधेस्तलस्पृशः।
प्रतिपादयन्ति गतिमापवर्गिकीं
यतिसार्वभौमपदसात्कृताशयाः॥ 21॥

मूले निविश्य महतां निगमद्रुमाणां
मुष्णन् प्रतारकभयं धृतनैकदण्डः।
रङ्गेशभक्तजनमानसराजहंसः
रामानुजः शरणमस्तु मुनिः स्वयं नः॥ 22॥

सन्मन्त्रवित् क्षिपति संयमिनां नरेन्द्रः
संसारजिह्मगमुखैः समुपस्थितं नः।
विष्वक्ततं विषयलोभविषं निजाभिः
गाढानुभावगरुडध्वजभावनाभिः॥ 23॥

नाथः स एष यमिनां नखरश्मिजालैः
अन्तर्निलीनमपनीय तमो मदीयम्।
विज्ञानचित्रमनघं लिखतीव चित्ते
व्याख्यानकेळिरसिकेन कराम्बुजेन॥ 24॥

उद्गृह्णतीमुपनिषत्सु निगूढमर्थं
चित्ते निवेशयितुमल्पधियां स्वयं नः।
पश्येम लक्ष्मणमुनेः प्रतिपन्नहस्ताम्
उन्निद्रपद्मसुभगामुपदेशमुद्राम्॥ 25॥

आकर्षणानि निगमान्तसरस्वतीनाम्
उच्चाटनानि बहिरन्तरुपप्लवानाम्।

पथ्यानि घोरभवसञ्ज्वरपीडितानां
हृद्यानि भान्ति यतिराजमुनेर्वचांसि ॥ **26** ॥

शीतस्वभावसुभगानुभवः शिखावान्
दोषावमर्दनियतोन्नतिरोषधीशः ।
तापानुबन्धशमनस्तपनः प्रजानां
रामानुजो जयति संवलितत्रिधामा ॥ **27** ॥

जयति सकलविद्यावाहिनीजन्मशैलः
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यः
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥ **28** ॥

मुनिबहुमतसारा मुक्तिनिश्रेणिकेयं
सहृदयहृदयानां शाश्वती दिष्टसिद्धिः ।
शमितदुरितगन्धा संयमीन्द्रस्य सूक्तिः
परिचितगहना नः प्रस्नुवीत प्रसादम् ॥ **29** ॥

भवमरुपरिखिन्नस्फीतपानीयसिन्धुः
दुरितरहितजिह्वादुग्धकुल्यासकुल्या ।
श्रुतिनयनसनाभिः शोभते लक्ष्मणोक्तिः
नरकमथनसेवास्वादनाडिन्धमा नः ॥ **30** ॥

हरिपदमकरन्दस्यन्दिनः संश्रितानाम्
अनुगतबहुशाखास्तापमुन्मूलयन्ति ।
शमितदुरितगन्धाः संयमीन्द्रप्रबन्धाः
कथकजनमनीषाकल्पनाकल्पवृक्षाः ॥ **31** ॥

नानाभूतैर्जगति समयैर्नर्मलीलां विधित्सोः
अन्त्यं वर्णं प्रथयति विभोरादिमव्यूहभेदे ।

विश्वं त्रातुं विषयनियतं व्यञ्जितानुग्रहः सन्
विष्वक्सेनो यतिपतिरभूद्वेत्रसारस्त्रिदण्डः ॥ 32 ॥

लक्ष्यं बुद्धे रसिकरसनालास्यलीलानिदानं
शुद्धास्वादं किमपि जगति श्रोत्रदिव्यौषधं नः।
लक्ष्यालक्ष्यैः सितजलधिवद्भाति तात्पर्यरत्नैः
लक्ष्मीकान्तस्फटिकमुकुरो लक्ष्मणार्योपदेशः ॥ 33 ॥

स्थितिमवधीरयन्त्यतिमनोरथसिद्धिमतीं
यतिपतिसम्प्रदायनिरपायधनोपचिताः।
मधुकरमौळिदघ्नमददन्तुरदन्ति घटा -
करटकटाहवाहिघनशीकरशीभरिताम् ॥ 34 ॥

निरुपधिरङ्गवृत्तिरसिकानभिताण्डवयन्
निगमविमर्शकेळिरसिकैर्निभृतैर्विधृतः।
गुणपरिणद्धसूक्तिदृढकोणविघट्टनया
रटति दिशामुखेषु यतिराजयशः पटहः ॥ 35 ॥

इदम्प्रथमसम्भवत्कुमतिजालकूलङ्कषाः
मृषामतविषानलज्वलितजीवजीवातवः।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तयः
चिरन्तनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः ॥ 36 ॥

सुधाशनसुदुर्ग्रहश्रुतिसमष्टिमुष्टिन्धयः
कथाहवमसौ गतान् कपटसौगतान् खण्डयन्।
मुनिर्मनसि लक्ष्मणो मुदमुदञ्चयत्यञ्जसा
मुकुन्दगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ॥ 37 ॥

कपर्दिमतकर्दमं कपिलकल्पनावागुरां
दुरत्ययमतीत्य तद् द्रुहिणतन्त्रयन्त्रोदरम्।

कुदृष्टिकुहनामुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ॥ **38** ॥

कणादपरिपाटिभिः कपिलकल्पनानाटकैः
कुमारिलकुभाषितैर्गुरुनिबन्धनग्रन्थिभिः।
तथागतकथाशतैस्तदनुसारिजल्पैरपि
प्रतारितमिदं जगत् प्रगुणितं यतीन्द्रोक्तिभिः ॥ **39** ॥

कथाकलहकौतुकग्रहगृहीतकौतस्कुत -
प्रथाजलधिसम्प्लवग्रसनकुम्भसम्भूतयः।
जयन्ति सुधियो यतिक्षितिभृदन्तिकोपासना -
प्रभावपरिपक्त्रिमप्रमितिभारतीसम्पदः ॥ **40** ॥

यतीश्वरसरस्वतीसुरभिताशयानां सतां
वहामि चरणाम्बुजं प्रणतिशालिना मौळिना।
तदन्यमतदुर्मदज्वलितचेतसां वादिनां
शिरस्सु निहितं मया पदमदक्षिणं लक्ष्यताम् ॥ **41** ॥

भजस्व यतिभूपतेरनिदमादिदुर्वासना -
कदध्वपरिवर्तनश्रमनिवर्तनीं वर्तनीम्।
लभस्व हृदय स्वयं रथपदायुधानुग्रह -
द्रुतप्रहृतिनिस्त्रुटद्दुरितदुर्वृतिं निर्वृतिम् ॥ **42** ॥

कुमतिविहितग्रन्थग्रन्थिप्रभूतमतान्तर -
ग्रहिळमनसः पश्यन्त्यल्पां यतीश्वरभारतीम्।
विकटमुरभिद्वक्षःपीठीपरिष्करणोचितः
कुलगिरितुलारोहे भावी कियानिव कौस्तुभः ॥ **43** ॥

स्थविरनिगमस्तोमस्थेयां यतीश्वरभारतीं
कुमतिफणितिक्षोभक्षीबाः क्षिपन्तु भजन्तु वा।

रसपरिमळश्लाघाघोषस्फुटत्पुटभेदनं
लवणवणिजः कर्पूरार्घं किमित्यभिमन्वते ॥ **44** ॥

वहति महिळामाद्यो वेधास्त्रयीमुखरैर्मुखैः
वरतनुतया वामो भागः शिवस्य विवर्तते।
तदपि परमं तत्त्वं गोपीजनस्य वशंवदं
मदनकदनैर्न क्लिश्यन्ते यतीश्वरसंश्रयाः ॥ **45** ॥

निगमपथिकच्छायाशाखी निराशमहानिधिः
महितविविधच्छात्रश्रेणीमनोरथसारथिः।
त्रिभुवनतमःप्रत्यूषोऽयं त्रिविद्यशिखामणिः
प्रथयति यतिक्ष्माभृत् पारावरीमविपर्ययाम् ॥ **46** ॥

जडमतिमुधादन्तादन्तिव्यथौषधसिद्धयः
प्रमितिनिधयः प्रज्ञाशालिप्रपालनयष्टयः।
श्रुतिसुरभयः शुद्धानन्दाभिवर्षुकवारिदाः
यमगतिकथाविच्छेदिन्यो यतीश्वरसूक्तयः ॥ **47** ॥

प्रतिकलमिह प्रत्यक्तत्त्वावलोकनदीपिकाः
यतिपरिबृढग्रन्थाश्चिन्तां निरन्तरयन्ति नः।
अकलुषपरज्ञानौत्सुक्यक्षुधातुरदुर्दशा -
परिणतफलप्रत्यासीदत्फलेग्रहिसुग्रहाः ॥ **48** ॥

मुकुन्दाङ्घ्रिश्रद्धाकुमुदवनचन्द्रातपनिभाः
मुमुक्षामक्षोभ्यां ददति मुनिबृन्दारकगिरः।
स्वसिद्धान्तध्वान्तस्थिरकुतुकदुर्वादिपरिषद् -
दिवाभीतप्रेक्षादिनकरसमुत्थानपरुषाः ॥ **49** ॥

निराबाधा बोधायनफणितिनिष्यन्दसुभगाः
विशुद्धोपन्यासव्यतिभिदुरशारीरकनयाः।

अकुण्ठैः कल्पन्ते यतिपतिनिबन्धा निजमुखैः
अनिद्राणप्रज्ञारसधमनिवेधाय सुधियाम् ॥ 50 ॥

विकल्पाटोपेन श्रुतिपथमशेषं विघटयन्
यदृच्छानिर्दिष्टे यतिनृपतिशब्दे विरमति।
वितण्डाहङ्कुर्वत्प्रतिकथकवेतण्डपृतना -
वियातव्यापारव्यतिमथनसंरम्भकलहः ॥ 51 ॥

प्रतिष्ठा तर्काणां प्रतिपदमृचां धाम यजुषां
परिष्कारः साम्नां परिपणमथर्वाङ्गिरसयोः।
प्रदीपस्तत्त्वानां प्रतिकृतिरसौ तापसगिरां
प्रसत्तिं संवित्तेः प्रदिशति यतीशानफणितिः ॥ 52 ॥

हतावद्ये हृद्ये हरिचरणपङ्केरुहयुगे
निबध्नन्त्यैकान्त्यं किमपि यतिभूभृत्फणितयः।
शुनासीरस्कन्दद्रुहिणहरहेरम्बहुतभुक् -
प्रभेशादिक्षुद्रप्रणतिपरिहारप्रतिभुवः ॥ 53 ॥

यथाभूतस्वार्था यतिनृपतिसूक्तिर्विजयते
सुधासन्दोहाब्धिः सुचरितविपक्तिः श्रुतिमताम्।
कथादृप्यत्कौतस्कुतकलहकोलाहलहत -
त्रिवेदीनिर्वेदप्रशमनविनोदप्रणयिनी ॥ 54 ॥

श्रुतिश्रेणीचूडापदबहुमते लक्ष्मणमते
स्वपक्षस्थान् दोषान् वितथमतिरारोपयति यः।
स्वहस्तेनोत्क्षिप्तैः स खलु निजगात्रेषु बहुळं
गळद्भिर्जम्बालैर्गगनतलमालिम्पति जडः ॥ 55 ॥

निरालोके लोके निरुपधिपरस्नेहभरितः
यतिक्ष्माभृद्दीपो यदि न किल जाज्वल्यत इह।

अहङ्कारध्वान्तं विजहति कथङ्कारमनघाः
कुतर्कव्याळौघं कुमतिमतपाताळकुहरम् ॥ **56** ॥

यतिक्ष्माभृद्दृष्टं मतमिह नवीनं तदपि किं
ततः प्रागेवान्यद्वद तदपि किं वर्णनिकषे।
निशाम्यन्तां यद्वा निजमततिरस्कारविगमात्
निरातङ्काष्टङ्कद्रमिडकुहदेवप्रभृतयः ॥ **57** ॥

सुधासारं श्रीमद्यतिवरभुवः श्रोत्रकुहरे
निषिञ्चन्ति न्यञ्चन्निगमगरिमाणः फणितयः।
यदास्वादाभ्यासप्रचयमहिमोल्लासितधियां
सदाऽऽस्वाद्यं काले तदमृतमनन्तं सुमनसाम् ॥ **58** ॥

यतिक्षोणीभर्तुर्यदिदमनिदम्भोगजनता -
शिरःश्रेणीजुष्टं तदिह दृढबन्धं प्रभवति।
अविद्यारण्यानीकुहरविहरन्मामकमनः -
प्रमाद्यन्मातङ्गप्रथमनिगळं पादयुगळम् ॥ **59** ॥

सवित्री मुक्तानां सकलजगदेनःप्रशमनी
गरीयोभिस्तीर्थैरुपचितरसा यामुनमुखैः।
निरुच्छेदा निम्नेतरमपि समाप्लावयति मां
यदृच्छाविक्षेपाद्यतिपतिदयादिव्यतटिनी ॥ **60** ॥

चिन्ताशेषदुरर्थदन्तुरवचःकन्थाशतग्रन्थिलाः
सिद्धान्ता न समिन्धते यतिपतिग्रन्थानुसन्धायिनि।
मुक्ताशुक्तिविशुद्धसिद्धतटिनीचूडालचूडापदः
किं कुल्यां कलयेत खण्डपरशुर्मण्डूकमञ्जूषिकाम् ॥ **61** ॥

वन्दे तं यमिनां धुरन्धरमहं मानान्धकारद्रुहा
पन्थानं परिपन्थिनां निजदृशा रुन्धानमिन्धानया।
दत्तं येन दयासुधाम्बुनिधिना पीत्वा विशुद्धं पयः
काले नः करिशैलकृष्णजलदः काङ्क्षाधिकं वर्षति॥ **62**॥

काषायेण गृहीतपीतवसना दण्डैस्त्रिभिर्मण्डिता
सा मूर्तिर्मुरमर्दनस्य जयति त्रय्यन्तसंरक्षिणी।
यत्प्रख्यापिततीर्थवर्धितधियामभ्यस्यतां यद्गुणान्
आ सिन्धोरनिदम्प्रदेशनियता कीर्तिः प्रजागर्ति नः॥ **63**॥

लिप्से लक्ष्मणयोगिनः पदयुगं रथ्यापरागच्छटा -
रक्षारोपणधन्यसूरिपरिषत्सीमन्तसीमान्तिकम्।
भिक्षापर्यटनक्षणेषु बिभराञ्चक्रे गळत्किल्बिषा
यद्विन्यासमिषेण पत्रमकरीमुद्रां समुद्राम्बरा॥ **64**॥

नानातन्त्रविलोभितेन मनसा निर्णीतदुर्नीतिभिः
कष्टं कुत्सितदृष्टिभिर्यतिपतेरादेशवैदेशिकैः।
व्यासो हासपदीकृतः परिहृतः प्राचेतसश्चेतसः
क्लृप्तः केळिशुकः शुकः स च मुधाबाधाय बोधायनः॥ **65**॥

अर्थ्या तिष्ठति मामिका मतिरसावाजन्मराजन्वती
पत्या संयमिनामनेन जगतामत्याहितच्छेदिना।
यत्सारस्वतदुग्धसागरसुधासिद्धौषधास्वादिनां
प्रस्वापाय न बोभवीति भगवन्मायामहायामिनी॥ **66**॥

शुद्धादेशवशंवदीकृतयतिक्षोणीशवाणीशता -
प्रत्यादिष्टबहिर्गतिः श्रुतिशिरःप्रासादमासीदति।
दुग्धोदन्वदपत्यसन्निधिसदासामोददामोदर -
श्लक्ष्णालोकनदौर्ललित्यललितोन्मेषा मनीषा मम॥ **67**॥

आस्तां नाम यतीन्द्रपद्धतिजुषामाजानशुद्धा मतिः
तच्चाव्याजविदग्धमुग्धमधुरं सारस्वतं शाश्वतम्।
को वा चक्षुरुदञ्चयेदपि पुरः साटोपतर्कच्छटा -
शस्त्राशस्त्रिविहारसम्भृतरणास्वादेषु वादेषु नः॥ **68** ॥

पर्याप्तं पर्यचैषं कणचरणकथामाक्षपादं शिशिक्षे
मीमांसामांसलात्मा समजनिषि मुहुः साङ्ख्ययोगौ समाख्यम्।
इत्थं तैस्तैर्यतीन्द्रत्रुटितबहुमृषातन्त्रकान्तारपान्थैः
अन्तर्मोहक्षपान्धैरहह किमिह नश्चिन्तनीयं तनीयः॥ **69** ॥

गाथा ताथागतानां गळति गमनिका कापिली क्वाऽपि लीना
क्षीणा काणादवाणी द्रुहिणहरगिरः सौरभं नारभन्ते।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवाद्दूरवान्तं
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम्॥ **70** ॥

विष्वग्व्यापिन्यगाधे यतिनृपतियशःसम्पदेकार्णवेऽस्मिन्
श्रद्धाशुद्धावगाहैः शुभमतिभिरसौ वेङ्कटेशोऽभिषिक्तः।
प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवृत्त्या
सप्तत्या सारवत्या समतनुत सतां प्रीतिमेतां समेताम्॥ **71** ॥

आशामतङ्गजगणानविषह्यवेगान्
पादे यतिक्षितिभृतः प्रसभं निरुन्धन्।
कार्यः कथाहवकुतूहलिभिः परेषां
कर्णे स एष कवितार्किकसिंहनादः॥ **72** ॥

उपशमितकुदृष्टिविप्लवानां
उपनिषदामुपचारदीपिकेयम्।
कबळितभगवद्विभूतियुग्मां
दिशतु मतिं यतिराजसप्ततिर्नः॥ **73** ॥

करतलामलकीकृतसत्पथाः
श्रुतिवतंसितसूनृतसूक्तयः।
दिवसतारकयन्ति समत्सरान्
यतिपुरन्दरसप्ततिसादराः॥ 74 ॥

॥ इति श्री यतिराजसप्ततिः समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुदर्शनाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रतिभटश्रेणिभीषण वरगुणस्तोमभूषण
जनिभयस्थानतारण जगदवस्थानकारण।
निखिलदुष्कर्मकर्शन निगमसद्धर्मदर्शन
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ 1 ॥

शुभजगद्रूपमण्डन सुरगणत्रासखण्डन
शतमखब्रह्मवन्दित शतपथब्रह्मनन्दित।
प्रथितविद्वत्सपक्षित भजदहिर्बुध्न्यलक्षित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ 2 ॥

स्फुटतटिज्जालपिञ्जर पृथुतरज्वालपञ्जर
परिगतप्रत्नविग्रह पटुतरप्रज्ञदुर्ग्रह।
प्रहरणग्राममण्डित परिजनत्राणपण्डित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ 3 ॥

निजपदप्रीतसद्गण निरुपधिस्फीतषड्गुण
निगमनिर्व्यूढवैभव निजपरव्यूहवैभव।
हरिहयद्वेषिदारण हरपुरप्लोषकारण
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ 4 ॥

दनुजविस्तारकर्तन जनितमिस्राविकर्तन
दनुजविद्यानिकर्तन भजदविद्यानिवर्तन।
अमरदृष्टस्वविक्रम समरजुष्टभ्रमिक्रम
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन॥ 5॥

प्रतिमुखालीढबन्धुर पृथुमहाहेतिदन्तुर
विकटमायाबहिष्कृत विविधमालापरिष्कृत।
स्थिरमहायन्त्रतन्त्रित दृढदयातन्त्रयन्त्रित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन॥ 6॥

महितसंपत्सदक्षर विहितसंपत्षडक्षर
षडरचक्रप्रतिष्ठित सकलतत्त्वप्रतिष्ठित।
विविधसङ्कल्पकल्पक विबुधसङ्कल्पकल्पक
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन॥ 7॥

भुवननेत्रत्रयीमय सवनतेजस्त्रयीमय
निरवधिस्वादुचिन्मय निखिलशक्ते जगन्मय।
अमितविश्वक्रियामय शमितविष्वग्भयामय
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन॥ 8॥

द्विचतुष्कमिदं प्रभूतसारं पठतां वेङ्कटनायकप्रणीतम्।
विषमेऽपि मनोरथः प्रधावन् न विहन्येत रथाङ्गधुर्यगुप्तः॥ 9॥

॥ इति श्री सुदर्शनाष्टकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक दिनचर्या ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमल्लक्ष्मण योगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे॥

काञ्चीपुरी यस्य हि जन्मभूमिः
विहारभूर्वेङ्कटभूधरेन्द्रः।
वासस्थली रङ्गपुरी तमीड्यं
श्रीवेङ्कटेशं गुरुमाश्रयामः॥ 1 ॥

संभावना यस्य हि कालकूटः
सभा भुजङ्गी कुणपं तरुण्यः।
स्याद्रौरवं राजगृहं स जीयात्
चिरं गुरुर्वेङ्कटनाथनामा॥ 2 ॥

यः प्रातरभ्येत्य हरिं शुचीनि
द्रव्याण्युपादाय शुचिः कृतेज्यः।
स्वाध्याययुक्तो निशि योगरूपां
निद्रां समारोहति तं नतास्स्मः॥ 3 ॥

यामे तुरीये यतवाग्रजन्याः
विहाय शय्यां विहिताङ्घ्रि शुद्धिः।
योऽत्यादरेणाऽऽस्थितयोगशेषः
तं वेङ्कटेशं गुरुमाश्रयामः॥ 4 ॥

ततोऽनुसन्धाय ततिं गुरूणां
तं चापि देवं रमणं रमायाः।
तत्कालयोग्यानि तथाविधानि
हृद्यानि पद्यानि पठन्तमीडे॥ 5॥

उत्थाय गेहादुपगम्य रम्यां
कवेरकन्यां कलिताङ्घ्रिशुद्धिः।
ततो विशोध्याऽप्सु निमज्ज्य शुभ्रं
वस्त्रं वसानं तमहं स्मरामि॥ 6॥

धृत्वोर्ध्वपुण्ड्राणि सरोजबीज -
मालामवन्ध्यां समुपास्य सन्ध्याम्।
सावित्रमीशं सवितुस्त्वथर्चा
स्तुवन्तमेकाग्रधिया स्तुवे तम्॥ 7॥

ततस्स पौर्वाह्णिकनित्यकर्म
निर्वर्त्य नित्येष्टनिवृत्तिमार्गः।
श्रीरङ्गधामोपसमेत्य सेवा -
क्रमेण रङ्गेश्वरपादमूलम्॥ 8॥

प्राबोधिकीभिः प्रतिबोध्य गीर्भिः
प्रसाद्य तद्द्वद्यमुखैः प्रबन्धैः।
आशास्य तन्मङ्गळमाप्तवाक्यैः
आपादचूडं कलयन्तमीडे॥ 9॥

तीर्थप्रसादादिकमत्र लब्ध्वा
विज्ञाप्य देवाय ततो विसृष्टः।
शनैरुपेत्याऽऽश्रमकल्पमात्म -
गृहं सुखासीनमहं स्मरामि॥ 10॥

व्याख्यानशालामुपगम्य चाथ
शिष्याननन्यान् श्रवणाभिमुख्यान्।
सङ्ग्राहयन्तं सकलानि तन्त्राणि
अतन्द्रितं तं गुरुमाश्रयेऽहम्॥ **11** ॥

तास्संस्कृतद्रामिडदिव्यसूक्तीः
प्रसन्नगंभीरतया प्रसिद्धाः।
तत्तद्रुचिभ्यस्तनयाविशेषं
प्रणौमि दान्तं प्रतिपादयन्तम्॥ **12** ॥

शिष्यैरुपादानपरैरनन्यैः
समर्पितं भक्तिपुरस्सरं यत्।
तेनैव शुद्धेन यथोदितेन
तुष्यन्तमीडे तुषतुल्यरुक्मम्॥ **13** ॥

इत्थं ह्युपादाय च शास्त्रशिक्षां
तां चाप्युपादानपदे निवेश्य।
माध्याह्निकं कर्म समाप्य पश्चात्
वन्दे यजन्तं वरदं सदारम्॥ **14** ॥

अतस्करग्राह्यपवित्रपात्रैः
अनिन्द्रियोन्मादकरैर्हविर्भिः।
आराध्य देवं कमलासहायं
आराधये तं विहितानुयागम्॥ **15** ॥

यामे चतुर्थे निहतारिवर्गे
प्रबन्धनिर्माणविलोकनाद्यैः।
तथा पुराणाद्यवलोकनैश्च
कालं क्षिपन्तं कलये गुरुं तम्॥ **16** ॥

सायन्तनं कर्म समाप्य पश्चात्
समेत्य च श्रीवरदाह्वयस्य।
सहान्तरङ्गैः कुलदैवतस्य
समीपमारात् प्रणतं स्मरामि॥ 17॥

आशास्य तन्मङ्गळमच्युतस्य
तत्तत्प्रबन्धैश्च तदीयपङ्क्तिम्।
स्तुत्वैकतानं प्रतिगृह्य तीर्थ -
प्रसादमेनं कृतकृत्यमीडे॥ 18॥

अथान्तरङ्गैरुपदेवगेहं
अध्यास्य पीठं सरसैर्वचोभिः।
तेषां सुसूक्ष्मार्थविशेषशिक्षां
कुर्वाणमीडीमहि वेङ्कटेशम्॥ 19॥

शिष्याननुज्ञाप्य सुसूक्ष्मबुद्धीन्
कृतप्रणामान् कृपया गृहेभ्यः।
अध्यास्य शुद्धं शयनीयमत्र
योगाय सन्नद्धमहं स्मरामि॥ 20॥

हृत्पुण्डरीके वरदं सदारं
निवेश्य तत्पादसरोजयुग्मे।
आबद्धचित्तं सुसुखं शयानं
आराधये देशिकमस्मदीयम्॥ 21॥

योगस्वरूपामनुभूय निद्रां
यामे तुरीये प्रतिबुध्य भूयः।
स्वस्वामिभावाकलनात्मयोगं
भजे भजन्तं गुरुवेङ्कटेशम्॥ 22॥

इत्येवमेतामिह सर्वतन्त्र
स्वतन्त्रवेदान्तगुरूत्तमस्य।
नित्याभिजप्यां शुभनित्यचर्यां
जपन्ति ये ते दुरितं तरन्ति॥ 23 ॥

॥ इति श्रीमद्वेदान्तदेशिक दिनचर्या समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक प्रार्थनाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मण योगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे ॥

त्रयीचूडागुरो स्वामिन् कृपाम्भोराशिना त्वया।
विज्ञापनं मामकीनं श्रोतव्यं श्रितवत्सल ॥ 1 ॥

त्रय्यन्तार्य भवत्पाद पङ्केरुहजुषां सताम्।
स्वयं मयि सदा भूयादनुग्रहपरम्परा ॥ 2 ॥

श्रीसंयमीन्द्र सिद्धान्त निधिरक्षैकदीक्षित।
नियतं कुरु दासं मां सर्वतन्त्रस्वतन्त्र ते ॥ 3 ॥

ज्ञानभक्त्यादि सत्सम्पत् प्रदायिन्याऽनुकम्पया।
स्यादसाविति वीक्षस्व वेदान्ताचार्यवर्य माम् ॥ 4 ॥

श्री वेङ्कटेशघण्टात्मन् यतीन्द्रशठजित्प्रिय।
रहस्यत्रयसारोक्तनिष्ठां श्रेष्ठां प्रयच्छ मे ॥ 5 ॥

त्वत्कृतिष्वागमान्तार्य सम्यक्कृतपरिश्रमैः।
नित्ययोगो महाभागैः त्वदेकान्तिभिरस्तु नः ॥ 6 ॥

कदापि क्वापि केनापि कवितार्किकसिंह माम्।
श्रीकान्ततत्पराचार्येष्वप्रसक्तागसं कुरु ॥ 7 ॥

श्रीमद्वेङ्कटनाथार्य त्वदीयचरणद्वयम्।
भवत्वत्र परत्रापि मदीयं शरणं सदा॥ 8॥

सादरं व्याहरन्नेतत् प्रत्यहं प्रार्थनाष्टकम्।
वेदान्ताचार्यपादाब्ज भक्तिरत्नाकरो भवेत्॥ 9॥

जयति श्रुतिचूडार्यः श्रीमानद्भुतचन्द्रमाः।
सकला यत्र हि कलाः निर्मला नित्यपुष्कलाः॥ 10॥

॥ इति श्रीमद्वेदान्तदेशिक प्रार्थनाष्टकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदेशिकमङ्गळम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम्।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

सर्वतन्त्रस्वतन्त्राय सिंहाय कविवादिनाम्।
वेदान्ताचार्यवर्याय वेङ्कटेशाय मङ्गळम् ॥ 1 ॥

नभस्यमासि श्रोणायाम् अवतीर्णाय सूरये।
विश्वामित्रान्वयायास्तु वेङ्कटेशाय मङ्गळम् ॥ 2 ॥

पिता यस्यानन्तसूरिः पुण्डरीकाक्षयज्वनः।
पौत्रो यस्तनयस्तोतारम्बायास्तस्य मङ्गळम् ॥ 3 ॥

वेङ्कटेशावतारोऽयं तद्घण्टांशोऽथवा भवेत्।
यतीन्द्रांशोऽथवेत्येवं वितर्क्यायास्तु मङ्गळम् ॥ 4 ॥

श्रीभाष्यकारः पन्थानम् आत्मना दर्शितं पुनः।
उद्धर्तुमागतो नूनम् इत्युक्तायास्तु मङ्गळम् ॥ 5 ॥

यो बाल्ये वरदार्यस्य प्राचार्यस्य परां दयाम्।
अवाप्य वृद्धिं गमितः तस्मै योग्याय मङ्गळम् ॥ 6 ॥

रामानुजार्यादात्रेयात् मातुलात् सकलाः कलाः।
अवाप विंशत्यब्दे यः तस्मै प्राज्ञाय मङ्गळम् ॥ 7 ॥

श्रुतप्रकाशिका भूमौ येनादौ परिरक्षिता।
प्रवर्तिता च पात्रेषु तस्मै श्रेष्ठाय मङ्गळम्॥ 8॥

सांस्कृतीभिर्द्रामिडीभिः बह्वीभिः कृतिभिर्जनान्।
यस्समुज्जीवयामास तस्मै सेव्याय मङ्गळम्॥ 9॥

यः ख्यातिलाभपूजासु विमुखो वैष्णवे जने।
क्रयणीयदशां प्राप्तः तस्मै भव्याय मङ्गळम्॥ 10॥

यस्मादेव मया सर्वं शास्त्रमग्राहि नान्यतः।
तस्मै वेङ्कटनाथाय मम नाथाय मङ्गळम्॥ 11॥

पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च।
प्राप्याय प्रापकायास्तु वेङ्कटेशाय मङ्गळम्॥ 12॥

यः कृतं वरदार्येण वेदान्ताचार्यमङ्गळम्।
आशास्तेऽनुदिनं सोऽपि भवेन्मङ्गळभाजनम्॥ 13॥

## सप्तति रत्न मालिका

भाद्रपदमासगतविष्णुविमलर्क्षे
वेङ्कटमहीध्रपतितीर्थदिनभूते।
प्रादुरभवज्जगति दैत्यरिपुघण्टा
हन्त कवितार्किकमृगेन्द्रगुरुमूर्त्या॥

सशङ्खचक्रलाञ्छनः सदूर्ध्वपुण्ड्रमण्डितः
सकण्ठलग्नसत्तुलस्यनर्घपद्ममालिकः।
सितान्तरीयसूत्तरीय यज्ञसूत्रशोभितः
ममाविरस्तु मानसे गुरुः स वेङ्कटेश्वरः॥

अनन्तसूरिसूनवेऽभिनन्द्यमानवैभवाद्
 दिगन्तवादिहंसजैत्रकालमेघदेशिकात्।
उपात्तसर्वशासनाय हन्त वर्षविंशतौ
 पुनःपुनर्नमस्क्रियाऽस्तु वेङ्कटेशसूरये॥

कवितार्किककलभव्रजकबलीकृतिसिंहं
 कमलापतिकरुणारसपरिवर्धितबोधम्।
यतिनायकपदपङ्कजयुगलीपरतन्त्रं
 भज मानस बुधवेङ्कटपतिदेशिकमनिशम्॥

कलये सततं करुणाजलधिं करुणाविषयं कमलाधिपतेः।
कलिवैरिशठारिवचोरसिकं कवितार्किककेसरिसूरिगुरुम्॥

गुरौ वादिहंसाम्बुदाचार्यशिष्ये
 जना भक्तिहीना यतीन्द्राप्रियाः स्युः।
यतीन्द्राप्रिया विष्णुकारुण्यदूराः
 कुतो मुक्तिवार्ता हि तादृग्विधानाम्॥

वेदे सञ्जातखेदे मुनिजनवचने प्राप्तनित्यावमाने
 सङ्कीर्णे सर्ववर्णे सति तदनुगुणे निष्प्रमाणे पुराणे।
मायावादे समोदे कलिकलुषवशाच्छून्यवादेऽविवादे
 धर्मत्राणाय योऽभूत् स जयति भगवान् विष्णुघण्टावतारः॥

॥ इति श्रीदेशिकमङ्गळम् समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

वादिद्विपशिरोभङ्गपञ्चाननपराक्रमः।
श्रीमान् वेङ्कटनाथार्यः चिरं विजयतां भुवि॥